तेन मृत्युमिमं सन्तं स्तौति मृत्युरिति स्वयम् ॥६०॥
नाम्ना संकुसुको नाम यमपुत्रो जघन्यजः ।
संवर्तयंस्तमः सूर्याद् उषसं च प्रवर्तयन् ॥६१॥

दिवाकरं प्रसौत्येकः सविता तेन कर्मणा ।
उदितो भासयंल्लोकान् इमांश्चैव स्वरश्मिभिः ।
स्वयं वसिष्ठस्तेनैनम् ऋषिराह स्तुवन्भगम् ॥६२॥ ९२॥
पुष्यन् क्षितिं पोषयति प्रणुदन् रश्मिभिस्तमः ।
तेनैनमस्तौत्पूषेति भरद्वाजस्तु पञ्चभिः ॥६३॥
त्रीणि भान्ति रजांस्यस्य यत्पदानि तु तेजसा ।
तेन मेधातिथिः प्राह विष्णुमेनं त्रिविक्रमम् ॥६४॥
कृत्वा सायं पृथग्याति भूतेभ्यस्तमसोऽत्यये ।
प्रकाशं किरणैः कुर्वंस् तेनैनं केशिनं विदुः ॥६५॥
संप्रत्येकैकशस्त्वेनं यन्मन्यन्ते पृथङ्नराः ।
विश्वे विश्वानरस्तेन कर्मणा स्तुतिषु स्तुतः ॥६६॥
वृषेव कपिलो भूत्वा यन्नाकमधिरोहति ।
वृषाकपिरसौ तेन विश्वस्मादिन्द्र उत्तरः ।
रश्मिभिः कम्पयन्नेति वृषा वर्षिष्ठ एव सः ॥६७॥ ९३॥
सायाह्नकाले भूतानि स्वापयन्नस्तमेति यत् ।
वृषाकपिरितो वा स्याद् इति मन्त्रेषु दृश्यते ॥६८॥
त्रिषु धन्वेति हीन्द्रेण प्रयुक्तो वारिषाकपे ।
विष्णातेर्विशतेर्वा स्याद् वेवेष्टेर्व्याप्तिकर्मणः ।
विष्णुर्निरुच्यते सूर्यः सर्वं सर्वान्तरश्च यः ॥६९॥
पञ्च षड्विंशतिश्चैव यानि नामानि सप्त च ।
सम्यगग्नीन्द्रसूर्याणां तान्युक्तानि यथाक्रमम् ॥७०॥
नैपातिकानां नाम्नां तु प्रागुक्तैर्नामलक्षणैः ।
संपन्नानां पृथक्त्वेन परिसंख्या न विद्यते ॥७१॥ ९४॥
पार्थिवी मध्यमा दिव्या वागपि त्रिविधा तु या ।
तस्याः सूक्तानि नामानि यथास्थानं निबोधत ॥७२॥

कृत्स्नं तु भजते सूक्तम् एषा नद्य स्तुता भुवि ।
यदा चैनं भजन्त्यापो यदा चौषधयो यदा ॥७३॥
अरण्यानी च रात्री च श्रद्धा चोषाः सरस्वती ।
पृथिवी चैव नामैषा भूत्वाप्यृचं* भजन्ति च ॥७४॥
अमायी नामतोऽप्येषा भूत्वाग्नेयेषु केषुचित् ।
स्तुता निपातमात्रेण तत्र तत्रेह दृश्यते ॥७५॥
मध्ये सत्यदितिर्वाक् च भूत्वा चैषा सरस्वती ।
समग्रं भजते सूक्तं त्रिभिरेव तु नामभिः ॥७६॥ १५॥
एषैव दुर्गा भूत्वर्चं कृत्वा स्यात्सूक्तभागिनी ।
तन्नामानि यमीन्द्राणी सरमा रोमशोर्वशी ।
भवत्यग्न्या सिनीवाली राका चानुमतिः कुहूः ॥७७॥
गौर्धेनुर्देवपत्न्योऽघ्न्या पथ्या स्वस्तिश्च रोदसी ।
नैपातिकानि ऋग्भाञ्जि येषां नामानि कानिचित् ॥७८॥
यदा तु वाग्भवत्येषा सूर्यामुं लोकमाश्रिता ।
तथा सूक्तमुषा भूत्वा सूर्या च भजतेऽखिलम् ॥७९॥
वृषाकपाय्यृचं भूत्वा सरण्यूर्द्वे च ते ध्रुवम् ।
निपातमात्रं भजते द्युवश्च पृथिवी सती ॥८०॥
सूर्यामेव सतीमेतां गौरीं वाचं सरस्वतीम् ।
पश्यामो वैश्वदेवेषु निपातेनैव केवलाः ॥८१॥ १६॥
घोषा गोधा विश्ववारा अपालोपनिषन्निषत् ।
ब्रह्मजाया जुहूर्नाम अगस्त्यस्य स्वसादितिः ॥८२॥
इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी ।
लोपामुद्रा च नद्यश्च यमी नारी च शश्वती ॥८३॥
श्रीर्लाक्षा सार्पराज्ञी वाक् श्रद्धा मेधा च दक्षिणा ।
रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः ॥८४॥

नवकः प्रथमस्त्वासां वर्गस्तुष्टाव देवताः ।
ऋषिभिर्देवताभिश्च समूदे मध्यमो गणः ॥८५॥
आत्मनो भाववृत्तानि जगौ वर्गस्तथोत्तमः ।
उत्तमस्य तु वर्गस्य य ऋषिः सैव देवता ॥८६॥ १७॥
आत्मानमस्तौद्वर्गस्तु देवतां यस्तथोत्तमः ।
तस्मादात्मस्तवेषु स्याद् य ऋषिः सैव देवता ॥८७॥
संवादेष्वाह वाक्यं यः स तु तस्मिन्भवेदृषिः ।
यस्तेनोच्येत वाक्येन देवता तत्र सा भवेत् ॥८८॥
उच्चावचेषु चार्थेषु निपाताः समुदाहृताः ।
कर्मोपसंग्रहार्थे च क्वचिच्चौपम्यकारणात् ॥८९॥
ऊनानां पूरणार्थो वा पादानामपरे क्वचित् ।
मिताक्षरेषु ग्रन्थेषु पूरणार्थास्त्वनर्थकाः ॥९०॥
कमीमिद्विति विज्ञेया ये त्वनेकार्थकाश्च ते ।
इव न चिन्नु चत्वार उपमार्था भवन्ति ते ॥९१॥ १८॥
उपमार्थे नकारस्तु क्वचिदेव निपात्यते ।
मिताक्षरेषु ग्रन्थेषु प्रतिषेधे त्वनल्पशः ॥९२॥
इयन्त इति संख्यानं निपातानां न विद्यते ।
वशात्प्रकरणस्यैते निपात्यन्ते पदे पदे ॥९३॥
उपसर्गास्तु विज्ञेयाः क्रियायोगेन विंशतिः ।
विवेचयन्ति ते ह्यर्थं नामाख्यातविभक्तिषु ॥९४॥
अच्छ* श्रदन्तरित्येतान् आचार्यः शाकटायनः ।
उपसर्गान्* क्रियायोगान् मेने ते तु त्रयोऽधिकाः ॥९५॥
त्रीण्येव लोके लिङ्गानि पुमान् स्त्री च नपुंसकम् ।
नामसूक्तप्रयोगेषु वाच्यं प्रकरणं तथा ॥९६॥ १९॥
तेषां तु नामभिर्लिङ्गैर् ग्रहणं सर्वनामभिः ।

कृताकृतस्य सदृशो गृहीतस्य पुनर्ग्रहः ॥९७॥
पादसूक्तर्गर्धर्चनामान्यन्यानि यानि च ।
सर्वे नामानि चैवाहुर् अन्ये चैवं यथा कथा ॥९८॥
प्रधानमर्थः शब्दो हि तद्गुणायत्त इष्यते ।
तस्मान्नानान्वयोपायैः शब्दानर्थवशं नयेत् ॥९९॥
अतिरिक्तं पदं त्याज्यं हीनं वाक्ये निवेशयेत् ।
विप्रकृष्टं च संदध्याद् आनुपूर्वीं च कल्पयेत् ॥१००॥
लिङ्गं धातुं विभक्तिं च संनमेत्तत्र तत्र च ।
यद्यत्स्याच्छान्दसं मन्त्रे तत्तत्कुर्यात्तु लौकिकम् ॥१०१॥ २०॥
यावतामेव धातूनां लिङ्गं रूढिगतं भवेत् ।
अर्थश्चाप्यभिधेयः स्यात् तावद्भिर्गुणविग्रहः ॥१०२॥
धातूपसर्गावयवगुणशब्दं द्विधातुजम् ।
बह्वेकधातुजं वापि पदं निर्वाच्यलक्षणम् ॥१०३॥
धातुजं धातुजाज्जातं समस्तार्थजमेव वा ।
वाक्यजं व्यतिकीर्णं च निर्वाच्यं पञ्चधा पदम् ॥१०४॥
द्विगुर्द्वन्द्वोऽव्ययीभावः कर्मधारय एव च ।
पञ्चमस्तु बहुव्रीहिः षष्ठस्तत्पुरुषः स्मृतः ॥१०५॥
विग्रहान्निर्वचः कार्यं समासेष्वपि तद्धिते ।
प्रविभज्यैव निर्ब्रूयाद् दण्डार्हो दण्ड्य इत्यपि ॥१०६॥ २१॥
भार्या रूपवती चास्य रूपवद्भार्य इत्यपि ।
इन्द्रश्च सोमश्चेत्येवम् इन्द्रासोमौ निदर्शनम ॥१०७॥
शब्दरूपं पदार्थश्च व्युत्पत्तिः प्रकृतिर्गुणः ।
सर्वमेतदनेकार्थं दशानवगमे गुणाः ॥१०८॥
सामान्यवाचिनः शब्दा विशेषे स्थापिताः क्वचित् ।
पलायने यथा वृत्तिः को नु मर्या इतीषते ॥१०९॥

विशेषवाचिनस्त्वन्ये सामान्ये स्थापिताः क्वचित् ।
हिमेनाग्निमिति मन्त्रे हिमशब्दो निदर्शनम् ॥११०॥
पदमेकं समादाय द्विधा कृत्वा निरुक्तवान् ।
पूरुषादःपदं यास्को वृक्षेवृक्ष इति त्वृचि ॥१११॥ २२॥
अनेकं सत्तथा चान्यद् एकमेव निरुक्तवान् ।
अरुणो मा सकृन्मन्त्रे मासकृद्विग्रहेण तु ॥११२॥
पदव्यवायेऽपि पदे एकीकृत्य निरुक्तवान् ।
गर्भे निधानमित्येते न जामय इति त्वृचि ॥११३॥
पदजातिरविज्ञाता त्वःपदेऽर्थः शितामनि ।
स्वरानवगमोऽधायि वने नेत्यृचि दर्शितः ॥११४॥
शुनःशेपं नराशंसं द्यावा नः पृथिवीति च ।
निरस्कृतेतिप्रभृतिष्व् अर्थादासीत्क्रमो यथा ॥११५॥
वर्णस्य वर्णयोर्लोपो बहूनां व्यञ्जनस्य च ।
अत्राणीति कपिर्नाभा दनो यामीत्यघासु च ॥११६॥ २३॥
अर्थात्पदं स्वाभिधेयं पदाद्वाक्यार्थनिर्णयः ।
पदसंघातजं वाक्यं वर्णसंघातजं पदम् ॥११७॥
अर्थात्प्रकरणाल्लिङ्गाद् औचित्याद्देशकालतः ।
मन्त्रेष्वर्थविवेकः स्याद् इतरेष्विति च स्थितिः ॥११८॥
इति नानान्वयोपायैर् नैरुक्ते यो यतेत सः ।
जिज्ञासुर्ब्रह्मणो रूपम् अपि दुष्कृत्परं व्रजेत् ॥११९॥
यथेदमग्रे नैवासीद् असदप्यथवापि सत् ।
जज्ञे यथेदं सर्वं तद् भाववृत्तं वदन्ति तु ॥१२०॥
भावप्रधानमाख्यातं षड्विकारा भवन्ति ते ।
जन्मास्तित्वं परीणामो वृद्धिर्हानं विनाशनम् ॥१२१॥ २४॥
एतेषामेव षण्णां तु येऽन्ये भावविकारजाः ।

ते यथावाक्यमभ्यूह्याः सामर्थ्यान्मन्त्रवित्तमैः ॥१२२॥
देवानां च पितॄणां च नमस्कारैस्तथैव च ।
अथ व्यस्तं समस्तं वा शृणु व्याहृतिदैवतम् ॥१२३॥
व्याहृतीनां समस्तानां दैवतं तु प्रजापतिः ।
व्यस्तानामयमग्निश्च वायुः सूर्यश्च देवताः ॥१२४॥
वाग्देवत्योऽथवाप्यैन्द्रो यदि वा परमेष्ठिनः ।
ओंकारो वैश्वदेवो वा ब्राह्मो दैवः क एव वा ॥१२५॥ २५॥

RV. i. आग्नेयं प्रथमं सूक्तं मधुछन्दस आर्षकम् ।
ज्ञेयाः सर्वेऽन्यदेवत्यास् तृचाः सप्तात उत्तराः ॥१२६॥
वायव्यः प्रथमस्त्वेषाम् ऐन्द्रवायव उत्तरः ।
मैत्रावरुणोऽथाश्विनोऽथैन्द्रोऽतो वैश्वदेवकः ॥१२७॥
तन्नामा विश्वलिङ्गो वा गायत्रोऽन्यस्तु यस्तृचः ।
बहुदैवतमन्यत्तु वैश्वदेवेषु शस्यते ॥१२८॥
लुशे दुवस्यौ शार्याते गोतमेऽथ ऋजिश्वनि ।
अवत्सारे परुछेपे अत्रौ दीर्घतमस्यृषौ ॥१२९॥ २६॥
वसिष्ठे नाभानेदिष्ठे गये मेधातिथौ मनौ ।
कक्षीवति विहव्ये च बहुष्वन्येष्वथर्षिषु ॥१३०॥
अगस्त्ये बृहदुक्थे च विश्वामित्रे च गाथिनि ।
दृश्यन्ते विप्रवादाश्च तासु तासु स्तुतिष्विह ॥१३१॥
बह्वीनां संनिपातस्तु यस्मिन्मन्त्रे प्रदृश्यते ।
आचार्यौ यास्कशाण्डिल्यौ वैश्वदेवं तदाहतुः ॥१३२॥
पादं वा यदि वार्धर्चम् ऋचं वा सूक्तमेव वा ।
वैश्वदेवं वदेत्सर्वं यत्किंचिद्बहुदैवतम् ॥१३३॥
ऋषिभिर्देवताः सर्वा विश्वाभि स्तुतिभि स्तुताः ।
संज्ञा तु विश्वमित्येषा सर्वावाप्तौ निपातिता ॥१३४॥ २७॥

सारस्वतस्तु सप्तम एताः प्रउगदेवताः ।
सरस्वतीति द्विविधम् ऋक्षु सर्वासु सा स्तुता ॥१३५॥
नदीवद्देवतावच्च तत्राचार्यस्तु शौनकः ।
नदीवन्निगमाः षट् ते सप्तमो नेत्युवाच ह ॥१३६॥
अम्बेका च दृषद्वत्यां चित्र इच्च सरस्वती ।
इयं शुष्मेभिरित्येतं मेने यास्कस्तु सप्तमम् ॥१३७॥
पशोः सारस्वतस्यैतां याज्यां* मैत्रायणीयके ।
प्राधान्याद्धविषः पश्यन् वाच एवैतरोऽब्रवीत् ॥१३८॥
सुरूपकृत्नुमित्यैन्द्रं सप्त चान्यान्यतः परम् ।
षळादह स्वधामनु मारुत्योऽनन्तरा ऋचः ॥१३९॥ २८॥
एका वीळु चिदिन्द्राय मरुद्भिः सह गीयते ।
तस्या एकान्तरायास्तु अर्धर्चोऽन्यो द्विदेवतः ॥१४०॥
मरुद्गणप्रधानो हीत्थं चेन्द्रो विचिकित्सितः ।
मन्दू समानवर्चसा मन्दुना वा सवर्चसा ॥१४१॥
मन्दू इति प्रगृह्णन्ति येषामेव द्विदेवतः ।
एकदेवत्यमाम्नाय्यो विज्ञायाध्ययनात्पदम् ॥१४२॥
रोदसी देवपत्नीनाम् अथर्वाङ्गिरसे यथा ।
मरुद्गणप्रधानेयम् आचार्याणां स्तुतिर्मता ॥१४३॥
मरुद्गणप्रधानत्वाद् इन्द्रस्तु विचिकित्सितः ।
मरुद्गणं महेन्द्रस्य समांशं सकलं विदुः ॥१४४॥ २९॥
अग्निमित्यग्निदैवत्यं पादस्तत्र द्विदेवतः ।
निर्मथ्याहवनीयार्थाव् अग्निनाग्निः समिध्यते ॥१४५॥
द्वितीये द्वादशर्चे तु प्रत्यृचं यास्तु देवताः ।
स्तूयन्ते ह्यग्निना सार्धं तासां नामानि मे शृणु ॥१४६॥
प्रथमायां स्तुतश्चेध्मो द्वितीयायां तनूनपात् ।

नराशंसस्तृतीयायां चतुर्थ्यां स्तूयते त्विळः ॥१४७॥
बर्हिरेव तु पञ्चम्यां द्वारो देव्यस्ततोऽन्यया ।
नक्तोषासा तु सप्तम्याम् अष्टम्यां संस्तुतौ सह ॥१४८॥
दैव्याविति तु होतारौ नवम्यामृचि संस्तुताः ।
तिस्रो देव्यो दशम्यां तु ज्ञेयस्त्वष्टैव तु स्तुतः ॥१४९॥ ३०॥
एकादश्यां तु सूक्तस्य स्तुतं विद्याद्वनस्पतिम् ।
द्वादश्यां तु स्तुता देवीर् विद्यात्स्वाहाकृतीरिति ॥१५०॥
सूक्तेऽस्मिन्प्रत्यृचं यास्तु देवताः परिकीर्तिताः ।
ता एव सर्वास्वाप्रीषु द्वितीया तु विकल्पते ॥१५१॥
प्रैषैः सहाप्रीसूक्तानि तान्येकादश सन्ति च ।
यजूंषि प्रैषसूक्तं वा दशैतानीतराणि तु ॥१५२॥
सौत्रामणानि तु त्रीणि प्राजापत्याश्वमेधिके ।
पुरुषस्य तु यन्मेधे यजुःष्वेव तु तानि षट् ॥१५३॥
अत्रैव प्रैषसूक्तं स्यान् न यजुःष्वाद्रियेत तत् ।
तेषां प्रैषगतं सूक्तं यत्र दीर्घतमा जगौ ॥१५४॥ ३१॥
मेधातिथौ यदुक्तं च त्रीण्येवोभयवन्ति तु ।
ऋषौ गृत्समदे यच्च वाध्र्यश्वे च यदुच्यते ॥१५५॥
नराशंसवदत्रेश्च ददर्श च यदौर्वशः ।
तनूनपादगस्त्यश्च जमदग्निश्च यज्जगौ ॥१५६॥
विश्वामित्र ऋषिर्यच्च जगौ वै काश्यपोऽसितः ।
मेधातिथेर्ऋचां यास्तु प्रोक्ता द्वादश देवताः ॥१५७॥
संपद्यन्ते यथाग्निं ताः संपदं तां निबोधत ।
इध्मो यः सर्वमेवाग्निर् अयं हीध्मः समिध्यते ।
ध्मातेर्वैतत्कृतं रूपं ध्मातो हीध्मः समिध्यते ॥१५८॥
ध्मातो हीध्मः समिध्यते ॥ ३२॥

॥ इति बृहद्देवतायां द्वितीयोऽध्यायः ॥

तनूनपादयं त्वेव नाम्ना यछत्यसौ तनुम् ।
नपादिति प्रजामाहुर् अमुतोऽस्य च संभवम् ॥१॥
नराशंसमिहैके तु अग्निमाहुरथेतरे ।
नराः शंसन्ति सर्वेऽस्मिन् आसीना इति वाध्वरे ॥२॥
एतमेवाहुरन्येऽग्निं नराशंसोऽध्वरे ह्ययम् ।
नरैः प्रशस्य आसीनैर् आहुश्चैवर्त्विजो नरः ॥३॥
इळस्त्वृषिकृतं रूपम् ईडेश्च स्तुतिकर्मणः ।
इळावांस्तेन वोक्तोऽग्निर् इडिना वह्नि*कर्मणा ॥४॥
बर्हिरेवायमग्निस्तु सर्वं हि परिबृंहितम् ।
अन्नेन यजुतो वा सन् इध्मेन परिबृंहितः ॥५॥ १॥
द्वारस्तु देव्यो याः प्रोक्ता विश्वेषां तास्तु पत्नयः ।
अग्नायीमनुवर्तन्ते तथाग्नाय्यग्निमेव च ॥६॥
अग्नौ ध्रुवं स्थितास्तास्तु संस्तूयन्तेऽग्निना सह ।
प्राधान्यं तासु चैवाग्ने स्तुतिष्वेव हविःषु च ॥७॥
नक्तोषासौ च ये देव्याव् आग्नेय्यावेव ते स्मृते ।
व्याख्याग्नेयी हि कालस्य तस्यैवोषाः कलेव तु ॥८॥
तम उछत्युषा नक्तानक्तीमां हिमबिन्दुभिः ।
अपि वाव्यक्तवर्णेति नञ्पूर्वाञ्जेरिदं भवेत् ॥९॥
सा हि दोषा भवत्यादौ निशीथे सा तमस्वती ।
नाम्ना भवत्युषाश्चैव सैषा प्रागुदयाद्रवेः ॥१०॥ २॥
दैव्याविति तु होताराव् अग्नी पार्थिवमध्यमौ ।
दिव्यादग्नेर्हि जज्ञाते दैव्यौ तेनेह जन्मना ॥११॥

तिस्रस्तु देव्यो याः प्रोक्तास् त्रिस्थानैवेह सा तु वाक् ।
त्रिविधेनोच्यते नाम्ना ज्योतिःषु त्रिषु वर्तिनी ॥१२॥
अग्निमेवानुगेळा तु मध्यं प्राप्ता सरस्वती ।
अमुं स्थिताधि लोकं तु भारती भवति ह्यसौ ॥१३॥
सैषा तु त्रिविधा वाग्वै दिवि च व्योम्नि चेह च ।
व्यस्ता चैव समस्ता च भजत्यग्नीनिमानपि ॥१४॥
त्वष्टा तु यस्त्वयमेव पार्थिवोऽग्निरिति स्तुतिः ।
पार्थिवस्यास्य वर्चः स्युः कस्याप्यृक् चार्तवेषु च ॥१५॥ ३॥
त्विषितस्त्वक्षतेर्वा स्यात् तूर्णमश्नुत एव वा ।
कर्मसूत्तारणो वेति तेन नामैतदश्नुते ॥१६॥
यः सहस्रतमो रश्मी रवेश्चन्द्रमुपाश्रितः ।
सोऽपि त्वष्टारमेवाग्निं परं चेह च यन्मधु ॥१७॥
प्रादाद्ब्रह्मापि सुप्रीतः सुताय तदथर्वणः ।
स चाभवदृषिस्तेन ब्रह्मणा दीप्तिमत्तरः ॥१८॥
तमृषिं निषिषेधेन्द्रो मैवं वोचः क्वचिन्मधु ।
न हि प्रोक्ते मधुन्यस्मिञ् जीवन्तं त्वोत्सृजाम्यहम् ॥१९॥
तमृषिं त्वश्विनौ देवौ विविक्ते मध्वयाचताम् ।
स च ताभ्यां तदाचष्टे यदुवाच शचीपतिः ॥२०॥ ४॥
तमब्रूतां तु नासत्याव् आश्व्येन शिरसा भवान् ।
मध्वाशु ग्राहयत्वावां मेन्द्रस्त्वा वधीत्ततः ॥२१॥
आश्व्येन शिरसा तौ तु दध्यङ्ङाह यदश्विनौ ।
तदस्येन्द्रोऽहरत्स्वं तन्* न्यधत्तामस्य यच्छिरः ॥२२॥
दधीचश्च शिरश्चाश्व्यं कृत्तं* वज्रेण वज्रिणा ।
पपात सरसो मध्ये पर्वते शर्यणावति ॥२३॥
तदश्वस्तु समुत्थाय भूतेभ्यो विविधान्वरान् ।

प्रादाय युगपर्यन्तं तास्वेवाप्सु निमज्जति ॥२४॥
त्वष्टा रूपविकर्ता च योऽसौ माध्यमिके गणे ।
स्तुतः स च निपातेन सूक्तं तस्य न विद्यते ॥२५॥ ५॥
वनस्पतिं तु यं प्राहुर् अयं सोऽग्निर्वनस्पतिः ।
अयं वनानां हि पतिः पाता पालयतीति वा ॥२६॥
अग्निर्गार्त्समदेनायं वनस्पतिरितीळितः ।
मन्दस्वेत्यस्य सूक्तस्य षळृचस्य तृतीयया ॥२७॥
यूपवत्तरुवच्चैव स्तुतिर्यास्य प्रसङ्गजा ।
सर्वेणाञ्जन्तिसूक्तेन तृतीये सा तु मण्डले ॥२८॥
स्वाहाकृतयोऽनेकाश्च विदुषां मतयोऽभवन् ।
तत्सर्वं त्वयमेवाग्निर् भवतीति विनिश्चयः ॥२९॥
अयं हि कर्ता स्वाहानां कृतिस्तासामिहैकजा ।
अयं प्रसूतिर्भूतानां सर्वेषामयमव्ययः ॥३०॥ ६॥
तनूनपाद्वितीया च नराशंसवती च या ।
समस्येते प्रयोक्तव्ये त्रिष्वेवोभयवत्सु तु ॥३१॥
नराशंसवती वा स्याद् द्वितीया च प्रजार्थिनाम् ।
बलकामोऽन्नकामो वा भूतिमिच्छेद्यथापि यः ॥३२॥
आग्नेयं सूक्तमेभिर्यद् वैश्वदेवमिहोच्यते ।
तद्विश्वलिङ्गं गायत्रं वैश्वदेवेषु शस्यते ॥३३॥
इन्द्र सोमं पिबेतीदं यद्द्वादशकमार्तवम् ।
तस्मिन्सहर्तुना सप्त प्रत्यृचं स्तौति देवताः ॥३४॥
तथर्तुनेति षट्स्वृक्षु चतसृष्वृतुभिः सह ।
पुनर्द्वयोर्ऋतुनेति बहुत्वैकत्वलक्षिताः ॥३५॥ ७॥
ऋतवो देवताभिश्च निपातेनेह संस्तुताः ।
तथर्तुप्रैषसूक्ते च तथा गार्त्समदेऽपि च ॥३६॥

मुख्यया त्विन्द्रमेवास्तौन् मरुतस्तु द्वितीयया ।
तृतीयया तु त्वष्टारं चतुर्थ्या चाग्निमेव च ॥३७॥
पञ्चम्या तु पुनः शक्रं षष्ठ्या देवावृतावृधौ ।
सप्तम्याद्याभिरग्निं च चतुर्भिर्द्रविणोदसम् ॥३८॥
आदेशाद्दैवतं ज्ञेयम् ऋङ्मन्त्राणां न लिङ्गतः ।
न शक्यं लिङ्गतो ह्यासां ज्ञातुं तत्त्वेन दैवतम् ॥३९॥
एकादश्या तु नासत्यौ द्वादश्याग्निमिमं पुनः ।
पृथक्पृथक्स्तुतीदं तु सूक्तमाह रथीतरः ॥४०॥ ८॥
बहुदैवे द्विदैवे वा गुणैर्वा यत्र कर्मजैः ।
स्तूयते देवतैकैका विभक्तस्तुति तद्विदुः ॥४१॥
वैश्वदेवानि सूक्तानि त्रिविधानि भवन्ति तु ।
सूर्यसंस्तवसंयुक्तं विश्वलिङ्गं पृथक्स्तुति ॥४२॥
पृथक्स्तुतीति यत्प्रोक्तं तद्विद्याद्बहुदैवतम् ।
विश्वलिङ्गं तु तद्यत्र विश्वैः स्वैः कर्मजैर्गुणैः ॥४३॥
विश्वानुद्दिश्य यद्देवान् स्तौति सूर्यमनेकधा ।
देवानेवाभिसंस्तौति तं प्राहुः सूर्यसंस्तवम् ॥४४॥
न तु भागस्य सूक्तादौ सूक्तेष्वेवौषसेषु वा ।
न सावित्रे ह्वयामीति न सूर्यायां क्रतौ मखे ॥४५॥ ९॥
न चैवैवं प्रवादेषु मन्त्रेष्वन्येषु केषुचित् ।
न च यत्र सजोषेति पदं वा स्यात्सजूरिति ॥४६॥
यस्मिन्प्रसङ्गादपि तु बह्वीनां परिकीर्तनम् ।
वैश्वदेवं तदप्याह स्थविरो लामकायनः ॥४७॥
असंस्तुतं स्तुतं वापि प्रदिष्टं दैवतं क्वचित् ।
मन्त्रैस्तदृषयोऽर्चन्ति तां तु बुध्येत शास्त्रवित् ॥४८॥
आदौ हि मध्ये चान्ते च पृथक्त्वेषु च कर्तृभिः ।

कर्माण्यनपदिष्टानि प्रदिष्टान्यपि तु क्वचित् ॥४९॥
कर्मैव तावत्साश्विभ्यां निविदि स्तौति कर्मणा ।
यद्धेनुः सप्तनड्वाहौ वोळ्हा दोग्ध्याशुरेव वा ॥५०॥ १०॥
भागे यत्स्तौति चाग्न्यादीन् मित्रादींश्चाश्विसंस्तुतौ ।
यदेभिरिति चैतस्मिन् वैश्वदेवेऽग्निमर्चति ॥५१॥
तदाहुरादावन्ते च प्रायशोऽन्या स्तुवन्नृचः ।
प्रतियोगात्प्रसङ्गाद्वा स्तौत्यन्यामपि देवताम् ॥५२॥
यस्यां वदत्यर्थवादान् सा ज्ञेया सूक्तभागिनी ।
यां तु स्तौति प्रसङ्गेन सा विज्ञेया निपातिनी ॥५३॥
चतुर्धा भण्यते तस्मिन् सूक्ते वा सूक्तभागिनी ।
यस्मिन्सर्वांस्तु राजर्षीन् ऋषीन्वापि स्तुवन्नृषिः ॥५४॥
मेधातिथिरगस्त्यस्तु बृहदुक्थो मनुर्गयः ।
ऋजिश्वा वसुकर्णश्च शार्यातो गोतमो लुशः ॥५५॥ ११॥
स्वस्त्यात्रेयः परुच्छेपः कक्षीवान् गाथिनौर्वशौ ।
नाभाकश्चैव निर्दिष्टो दुवस्युर्ममतासुतः ॥५६॥
विहव्यः कश्यप ऋषिर् अवत्सारश्च नाम यः ।
वामदेवो मधुच्छन्दाः पार्थो दक्षसुतादितिः ॥५७॥
जुहूर्गृत्समदश्चर्षिर् देवाः सप्तर्षयश्च ये ।
यमोऽग्निस्तापसः कुत्सः कुसीदी चित एव च ॥५८॥
बन्धुप्रभृतयश्चैव चत्वारो भ्रातरः पृथक् ।
विष्णुश्च नेजमेषश्च नाम्ना संवननश्च यः ॥५९॥
एते तु सर्वे एवास्य विश्वैः स्वैः कर्मजैर्गुणैः ।
समस्तैरथ च व्यस्तैः पृथक्सूक्तेषु तुष्टुवुः ॥६०॥ १२॥
पार्थिवो द्रविणोदोऽग्निः पुरस्ताद्यस्तु कीर्तितः ।
तमाहुरिन्द्रं दातृत्वाद् एके तु बलवित्तयोः ॥६१॥

अयं हि द्रविणोदोऽग्निर् अयं दाता बलस्य हि ।
Bजायते च बलेनायं मथ्यत्यृषिभिरध्वरे ॥६२॥
Bहवींषि द्रविणं प्राहुर् हविषो यत्र जायते ।
Bदातारश्चर्त्विजस्तेषां द्रविणोदास्ततः स्वयम् ॥६३॥
Bऋषीणां पुत्र इत्येषां दृश्यते सहसो यहो ।
Bमध्यमाद्वा यतो जज्ञे तस्माद्वा द्राविणोदसः ॥६४॥
Aद्रविणोदोऽग्निरेवायं द्रविणोदास्तदोच्यते ।
Aआग्नेयेष्वेव दृश्यन्ते प्रवादा द्रविणोदसः ॥६५॥
ऐन्द्रस्य नवकस्येह यदैन्द्रावरुणं परम् ।
तस्योत्तरं च सोमानं स्तूयते ब्रह्मणस्पतिः ॥६६॥ १३॥
ऋग्भिः पञ्चभिराद्याभिस् तिसृभिः सदसस्पतिः ।
नराशंसोऽन्यया चर्चा सोमेन्द्रौ तु निपातितौ ॥६७॥
चतुर्थ्यां सोम इन्द्रश्च पञ्चम्यां दक्षिणाधिका ।
प्रसङ्गादृषिणा प्रोक्ताः संबन्धा स्थानलोकयोः ॥६८॥
प्राजापत्यं तथैन्द्रः स्याद् इति तस्येह नामनी ।
कथिते द्वे च षट् चान्यान्य् एषां चाद्यः प्रजापतिः ॥६९॥
Bशिष्टानि यानि नामानि तानि वक्ष्याम्यतः परम् ।
सत्पतिः* कश्च कामश्च सदसस्पतिरेव च ॥७०॥
इळस्पतिर्वाचस्पतिस् ततस्तु ब्रह्मणस्पतिः ।
तृतीयान्ये* तु सूक्तस्य प्रथमं पञ्चमं च यत् ॥७१॥ १४॥
चतुर्भिरितरैस्त्वेनं न सूक्तं नाप्यृगश्नुते ।
सर्वाण्येव तु सर्वासां देवतानां प्रजापतेः ॥७२॥
नामानि कथयन्त्येते सम्यग्भक्तिदिदृक्षवः ।
तदाहुर्नैतदेवं स्याद् अष्टानामेष हि स्मृतः ॥७३॥
तैरेव चास्य कल्पन्ते क्रतवश्च हवींषि च ।

मरुद्भिर्मध्यमस्थानैर् अयमग्निस्तु पार्थिवः ॥७४॥
नवकेनेह सूक्तेन प्रति त्यमिति संस्तुतः ।
मरुतां साहचर्यात्तु सूक्तेऽस्मिन्नाग्निमारुते ॥७५॥
मन्यते मध्यमं चैव यास्कोऽग्निं न तु पार्थिवम् ।
स्यादयं पार्थिवस्त्वेव तथा रूपं हि दृश्यते ॥७६॥ १५॥
हूयसे पीतये चेति वैद्युते न तदस्ति हि ।
अथ स्यादभिधानस्य देवतायाः पृथक् पृथक् ॥७७॥
ऋचोऽर्धर्चस्य पादस्य कथं ज्ञायेत दैवतम् ।
यथा निविदि सावित्र्यां स्तूयते कर्म कर्मणा ॥७८॥
दोग्ध्री धेनुर्वोढानड्वान् आशुः सप्तिः पुरंधिया ।
यथा च शंनोमित्रीया वरुणः प्राविता भुवत् ॥७९॥
सूक्तप्रायेणैभिरग्ने परीक्ष्यास्तत्र देवताः ।
शस्त्राणां द्वैपदादीनां द्विदैवबहुदैवतम् ॥८०॥
असंस्तुतं संस्तुतवत् प्रदिष्टं दैवतं क्वचित् ।
यत्र द्विदैवते मन्त्र एकवद्देवतोच्यते ॥८१॥
विभक्तस्तुति तद्विद्याद् बहुष्वबहुवच्च यत् ।
आशीर्वादेषु संज्ञासु कर्मसंस्थासु देवताः ।
बह्व्यो ह बहुवत्तत्र द्विपदे यत्र संस्तुते ॥८२॥ १६॥
सुधन्वन आङ्गिरसस्यासन्पुत्रास्त्रयः पुरा ।
ऋभुर्विभ्वा च वाजश्च शिष्यास्त्वष्टुश्च तेऽभवन् ॥८३॥
शिक्षयामास तांस्त्वष्टा त्वाष्ट्रं यत्कर्म किंचन ।
परिनिष्ठितकर्माणो विश्वे देवा उपाह्वयन् ॥८४॥
विश्वेषां ते ततश्चक्रुर् वाहनान्यायुधानि तु ।
B धेनुं सबर्दुघां चक्रुर् अमृतं सबरुच्यते ॥८५॥
B बृहस्पतेरथाश्विभ्यां रथं दिव्यं त्रिवन्धुरम् ।

Bइन्द्राय च हरी देवप्रहितेनाग्निनापि यत् ॥८६॥
Bएकं चमसमित्युक्ते ज्येष्ठ आहेत्यथो दिवि ।
Bउक्त्वा ततस्तु चमसान् यथोक्तं तेन हर्षिताः ॥८७॥ | १७॥
Bत्वष्टा च सविता चैव देवदेवः प्रजापतिः ।
Bसर्वान्देवान् समामन्त्र्य अमृतत्वं ददुश्च ते ॥८८॥
Bतेषामाद्यान्ययोर्नाम्ना दृश्यते बहुवत्स्तवः ।
तृतीयसवने तेषां तैस्तु भागः प्रकल्पितः ॥८९॥
अपिबत्सोममिन्द्रश्च तैस्तच सवने सह ।
तेषां स्तुतिरिदं सूक्तं त्वयमित्यष्टकं परम् ॥९०॥
इहेन्द्राग्नी स्तुतौ देवौ तृतीयस्यादिरश्विनौ ।
हिरण्यपाणिं सावित्र्यश् चतस्रश्चाप्यथोत्तराः ॥९१॥
एकाग्नेर्द्वे तु देवीनां द्वादश्यां देवपत्नयः ।
इन्द्राणी वरुणानी च अग्नायी च पृथक् स्तुताः ॥९२॥ १८॥
द्यावापृथिव्यौ द्वे च स्यात् स्योनेत्यृक् पार्थिवी स्मृता ।
देवानां वात इत्येषा सूक्तशेषस्तु वैष्णवः ॥९३॥
वायोस्तीव्रेन्द्रवायुभ्यां द्वृचौ द्वाभ्यां ततः परम् ।
तृचो मित्रावरुणयोस् तथेन्द्राय मरुत्वते ॥९४॥
तृचो विश्वेषां देवानां पूष्ण आघृणये तृचः ।
Bआसक्तो हि घृणिस्तस्य दध्नः पूर्णो दृती रथे ॥९५॥
Bआघृणिस्तत्स्तुतः पूषा कीरिभी रिभ्यते ततः ।
Bयथा हि मधुनः पूर्णो दृतिरथ्यैति चाश्विनौ ॥९६॥
Bआ वर्तनिं मधुनेति दृतिरेव* च दृश्यते ।
अर्धाष्टमा अपां ज्ञेया अध्यर्धान्याग्निदेवता ॥९७॥ १९॥
कस्य नूनं तु काम्याद्या आग्नेय्यृक् सवितुस्तृचः ।
भगभक्तस्य भागी वा परं यच्चिद्ध वारुणम् ॥९८॥

वसिष्वा हीति चाग्नेये ऋगग्नेर्मध्यमस्य तु ।
जराबोधेति विज्ञेया वैश्वदेव्युत्तमा नमः ॥९९॥
पराश्वतस्रो यचेति इन्द्रोलूखलयो स्तुतिः ।
मन्येते यास्ककात्थक्याव् इन्द्रस्येति तु भागुरिः ॥१००॥
यच्चिद्धुलूखलस्य द्वे द्वे परे मुसलस्य तु ।
चर्माधिषवणीयं वा सोमं वान्त्या प्रशंसति ॥१०१॥
ऐन्द्रं यच्चिद्धि सत्येति उत्तरं चाश्विनात्तृचात् ।
आश्विनादुत्तरः कस्त उषस्यस्तृच उत्तमः ॥१०२॥ २०॥
स्तूयमानः शश्वदिति प्रीतस्तु मनसा ददौ ।
शुनःशेपाय दिव्यं तु रथं सर्वं हिरण्मयम् ॥१०३॥
आग्नेयं यत्त्वमैन्द्रे च त्रिष्विदित्याश्विनं ततः ।
ऋतेऽर्थवादं कर्मैतद् इन्द्रस्येति तु शंसति ॥१०४॥
पादोऽग्नये ह्वयामीति मैत्रावरुण उत्तरः ।
तृतीयो रात्रिसंस्तावः सूक्तं सावित्रमुच्यते ॥१०५॥
पञ्चैतानि जगौ दृष्ट्वा सूक्तान्याङ्गिरसो मुनिः ।
हिरण्यस्तूपतां प्राप्य सख्यं चेन्द्रेण शाश्वतम् ॥१०६॥
आग्नेयं प्रेति मरुतां* क्रीळं त्रीणि पराण्यतः ।
उत्तिष्ठ ब्राह्मणस्पत्यं यं रक्षन्ति त्रयस्तृचाः ॥१०७॥ २१॥
वरुणार्यममित्राणां मध्य आदित्यदैवतः ।
पौष्णं सं पूषन्षड्ढौग्र्यस् तृतीया न तु केवला ॥१०८॥
मित्रेण वरुणेनाथ विश्वैर्देवैश्च संस्तवः ।
B उक्तमत्रर्षिणा पूर्वम् आदेशाद्दैवतं विना ॥१०९॥
B ज्ञातुं न शक्यते लिङ्गात् तथापि क्वचिदुच्यते ।
B आदित्या वसवो रुद्रास् त्वमग्न इति संस्तुताः ॥११०॥
B तिस्रः सौम्योऽग्न आग्नेये प्रगाथेनाश्विनौ स्तुतौ ।

Bसहोषसा लिङ्गभाजा अयं सोमः सुदानवः ॥१११॥
अर्धर्चो देवदेवत्य एषो इत्याश्विने परे ।
Bआदित्यं मन्यते यास्को हविषेति सह स्तुतम् ॥११२॥ २२॥
सहोषसे ततः सौर्यम् उदु त्यमिति संस्तुतः ।
शुभक्तिर्येन वरुणो रोगघ्नस्तृच उत्तमः ॥११३॥
रोगापनुत्तिराद्याभ्याम् उद्यन्नित्युत्तमे तृचे ।
अर्धर्चे तु द्विषद्द्वेषः ऐन्द्रः सव्यः शतर्चिषु ॥११४॥
स्वयमिन्द्रसमं पुत्रम् इच्छतोऽङ्गिरसो मुनेः ।
वध्व्येव सव्यो भूत्वर्षेर् योगित्वात्पुत्रतां गतः ॥११५॥
प्रथमे मण्डले ज्ञेया ऋषयस्तु शतर्चिनः ।
क्षुद्रसूक्तमहासूक्ता अन्ये मध्येषु मध्यमाः ॥११६॥
नवकं जातवेदस्यं नू चिद् यत्तु वया इति ।
वैश्वानरीयं तत्सूक्तं वह्निमाग्नेयमुत्तरम् ॥११७॥ २३॥
ऐन्द्राण्यस्मै ततस्त्रीणि वृष्णे शर्धाय मारुतम् ।
आग्नेयानि तु पश्वेति नव शश्वद्धि वामिति ॥११८॥
दशाश्विनानीमानीति इन्द्रावरुणयो स्तुतिः ।
सौपर्णेयास्तु याः काश्चिन् निपातस्तुतिषु स्तुताः ॥११९॥
उपप्रयन्तः सूक्तानि आग्नेयान्युत्तराणि षट् ।
हिरण्यकेशो रजसस् तृचोऽग्नेर्मध्यमस्य तु ॥१२०॥
इत्थेति पञ्च त्वैन्द्राणि यामित्यस्यां निपातिताः ।
दध्यङ् मनुरथर्वा च मारुतानि प्र ये ततः ॥१२१॥
चत्वार्या नो वैश्वदेवे द्वे देवानां स्तुतिर्मते ।
आ नो भद्राश्च देवानां भद्रं यावच्छतं पुनः ॥१२२॥ २४॥
मधु वातास्तृचे तस्मिन् परमं मध्वपीष्यते ।
अदितिर्द्यौरिति त्वस्यां विभूतिः कथितादितेः ॥१२३॥

त्वं सोम सौम्यमौषसम् एता उ त्यास्तृचोऽश्विनोः ।
अश्विनाग्नेः ससोमस्य अग्नीषोमाविति स्तुतिः ॥१२४॥
गोतमादौशिजः कुत्सः परुच्छेपादृषेः परः ।
कुत्साद्दीर्घतमाः शश्वत् ते द्वे एवमधीयते ॥१२५॥ २५॥
इमं कुत्स आङ्गिरसो ददर्श जातवेदस्यं जगाद षोळशर्चम् ।
A पूर्वो देवा इत्यृचो देवदेवास् त्रयः पादा उत्तमायास्ततोऽर्धम् ॥१२६॥
A तस्यैव वा यस्य तत्पूर्वसूक्तं मित्रादिभ्यो वाथ षड्भ्यः प्रकृताभ्यः ।
अन्त्योऽर्धर्चस्तु वा षण्णां स्तुतानां पूर्वो देवाः पादैस्तु त्रिभि स्तुताः ॥१२७॥
भरद्वाजे गृत्समदे वसिष्ठे नोधस्यगस्त्ये विमदे नभाके ।
कुत्से नोदर्का बहुदैवतेषु तथा द्विदेवेषु समानधर्मिणः ॥१२८॥
द्वे विरूपे सूक्तमौषसायाग्नये स प्रत्नथेति द्रविणोदसेऽग्नये ।
वैश्वानरस्येति वैश्वानरीयम् अस्मात्पूर्वं शुचयेऽग्नये पुनः ॥१२९॥
B जातवेदस्यं सूक्तसहस्रमेक ऐन्द्रात्पूर्वं कश्यपार्षं वदन्ति ।
B जातवेदसे सूक्तमाद्यं तु तेषाम् एकभूयस्त्वं मन्यते शाकपूणिः ॥१३०॥
स यो वृषेन्द्राणि पञ्च वैश्वदेवानि चन्द्रमाः ।
त्रीण्यैन्द्राग्ने य इन्द्राग्नी ततमित्यार्भवे परे ॥१३१॥ २६॥
त्रितं गास्त्वनुगच्छन्तं क्रूराः सालावृकीसुताः ।
कूपे प्रक्षिप्य गाः सर्वास् तत एवापजह्रिरे ॥१३२॥
स तत्र सुषुवे सोमं मन्त्रविन्मन्त्रवित्तमः ।
देवांश्चावाहयत्सर्वांस् तच्छुश्राव बृहस्पतिः ॥१३३॥
B आगच्छतोऽथ तान्दृष्ट्वा क्व वसत्यस्य तत्त्वतः ।
B सर्वदृक्कं च वरुणस्यार्यम्णश्चेत्युपालभत् ॥१३४॥
B कूपेष्टकाभिर्भ्रणितान्य् अङ्गान्येवाभवन्मम ।
B दृष्ट्वा सर्वानहं स्तौमि यद्यप्येको न पश्यति ॥१३५॥
बृहस्पतिप्रचोदिता विश्वेदेवगणास्त्रयः ।

जग्मुस्त्रितस्य तं यज्ञं भागांश्च जगृहुः सह ॥१३६॥ २७॥
बृहस्पतिस्त्रितस्यैतज् ज्ञानं विज्ञानमेव च।
तृचेनान्त्येन सूक्तस्य जगादर्षिरसाविति ॥१३७॥
द्यावापृथिव्योरीळेति आग्नेयः पाद उत्तरः।
आश्विनः सूक्तशेषः स्याद् इदं रात्र्युषसो स्तुतिः ॥१३८॥
इमा रौद्रं परं सौर्यं चित्रं पञ्चाश्विनान्यतः।
नासत्याभ्यामिति त्वन्ये अन्त्या दुःस्वप्ननाशिनी ॥१३९॥
ऐन्द्रं कवैश्वदेवं च प्रौषसे पृथुरुत्तरे।
ऋषिर्दानं च भाव्यस्य प्रातरित्यत्र शंसति ॥१४०॥
काक्षीवतं कदित्थेति यदैन्द्रमुपदिश्यते।
परोक्षं वैश्वदेवं तत् प्रदिष्टं स्वरसामसु ॥१४१॥ २८॥
अधिगम्य गुरोर्विद्यां गच्छन्स्वनिलयं किल।
कक्षीवानध्वनि श्रान्तः सुष्वापारण्यगोचरः ॥१४२॥
तं राजा स्वनयो नाम भावयव्यसुतो व्रजन्।
क्रीडार्थं सानुगोऽपश्यत् सभार्यः सपुरोहितः ॥१४३॥
अथैनं रूपसंपन्नं दृष्ट्वा देवसुतोपमम्।
कन्यादाने मतिं चक्रे वर्णगोत्राविरोधतः ॥१४४॥
संबोध्यैनं स पप्रच्छ वर्णगोत्रादिकं ततः।
राजन्नाङ्गिरसोऽस्मीति कुमारः प्रत्युवाच तम् ॥१४५॥
पुत्रोऽहं दीर्घतमस औचथ्यस्य ऋषेर्नृप।
अथास्मै स ददौ कन्या दशाभरणभूषिताः ॥१४६॥ २९॥
तावतश्च रथांस्तावान् वीड्वङ्गान्वै चतुर्युजः।
वधूनां वाहनार्थाय धनकुप्यमजाविकम् ॥१४७॥
निष्काणां वृषभाणां च शतं शतमदात्पुनः।
एतदुत्तरसूक्तेन शतमित्यादिनोदितम् ॥१४८॥

शतमश्वाञ्छतं निष्कान् रथान्दश वधूमतः ।
चतुर्युजो गवां चैव सहस्रं षष्ट्युपाधिकम् ॥१४९॥
स्वनयाद्भावयव्याद्यः कक्षीवान्प्रत्यपद्यत ।
प्रतिगृह्य च तुष्टाव प्रातः पित्रे शशंस च ॥१५०॥ ३० ॥
A फलप्रदर्शनं तस्य क्रियते प्रायशस्त्विह ।
A द्वितीयां तु पितापश्यत् सुगुरित्यादिकामृचम् ॥१५१॥
A काक्षीवतं* सर्वमिति भगवानाह शौनकः ।
A एषा तु दैर्घतमसी सानुलिङ्गा कथं भवेत् ॥१५२॥
A उच्यते प्रातरित्युक्ते सूनोर्दानेन हर्षितः ।
A राज्ञश्चाशिषमाहाष सुगुरित्यादिना किल ॥१५३॥
कर्माणि याभिः कथितानि राज्ञां दानानि चोच्चावचमध्यमानि ।
नाराशंसीरित्यृचस्ताःप्रतीयाद् याभि स्तुतिर्दाशतयीषु राज्ञाम्॥१५४॥
पश्चामन्दाद्भावयव्यस्य गीता जायापत्योः संप्रवादो द्वृचेन ।
संप्रवादं रोमशयेन्द्रराज्ञोर् एते ऋचौ मन्यते शाकपूणिः ॥१५५॥
इन्द्रेण जायापत्योश्चेतिहासं द्वृचेऽस्मिन्मन्यते शाकटायनः ।
प्रादात्सुतां रोमशां नाम नाम्ना बृहस्पतिर्भावयव्याय राज्ञे ॥१५६॥
बृहस्पतिर्भावयव्याय राज्ञे ॥ ३१ ॥

॥ इति बृहद्देवतायां तृतीयोऽध्यायः ॥

ततस्तमर्थं हरिवान्विदित्वा प्रियं सखायं स्वनयं दिदृक्षुः ।
अभ्याजगामाशु शचीसहायः प्रीत्यार्चयत्तं विधिनैव राजा ॥१॥
अभ्याजगामाङ्गिरसी च तत्र दृष्ट्वा तयोः सा चरणौ ववन्दे ।
इन्द्रः सखित्वादथ तामुवाच रोमाणि ते सन्ति न सन्ति राज्ञि ॥२॥
सा बालभावादथ तं जगाद उपोप मे शक्र परामृशेति ।
तां पूर्वया सान्त्व्य नृपः प्रहृष्टो अन्वव्रजत्साथ पतिं पतिव्रता ॥३॥
अथाग्नेये अग्निमित्युत्तरे यं पञ्चैन्द्राणि प्र तदैन्द्व्यृगत्र ।
युवं तमिन्द्रापर्वतौ सह स्तुतौ त्विन्द्रं मेन इह यास्कः प्रधानम् ॥४॥
ऋक्षु स्तुतः पर्वतवद्धि वज्री द्विवत्स्तुतौ चेन्द्रमाहुः प्रधानम् ।
आ त्वा वायोर्नैव पञ्चेन्द्रवाय्वोर् एका वायोरुत्तरं द्विप्रधानम् ॥५॥ १॥
तत्र पञ्च वरुणमित्रदेवा दिवादिभ्यः कथिताभ्यः परे द्वे ।
द्वे द्वे पदे संस्तुते रोदसी च देवाश्चार्धर्चेन विभक्तमन्यत् ॥६॥
मैत्रावरुणं सुषुमेति सूक्तं प्रप्र पौष्णं वैश्वदेवं तृतीयम् ।
अस्तु श्रौषड् वैश्वदेवं तृतीयं वैश्वदेवं स्याद्बहुदेवतेषु ॥७॥
बहुशस्तु वैश्वदेवेषु सन्त्यृचः पादार्धर्चो द्वैपदास्त्रैपदाश्च ।
द्विप्रधाना अपि चैकप्रधाना बहुप्रधाना अपि वैश्वदेवाः ॥८॥
वैश्वदेवी मैत्रावरुणी द्वितीया तिस्रोऽश्विभ्यां तत ऐन्द्री ततोऽग्नेः ।
मारुत्येका तत ऐन्द्राग्न्यनन्तरा बार्हस्पत्या चोत्तमा स्तौति देवान् ॥९॥
ऋषीनृषिर्वा स्तौति दध्यङ् ह मेऽस्याम् आत्मानं वा तेषु शंसन्स्वजन्म ।
तस्मादस्यां विप्रवदन्ति केचिद् इन्द्राग्नी तस्यां तु निपातभाजौ ॥१०॥ २॥
द्वावुचथ्यबृहस्पती ऋषिपुत्रौ बभूवतुः ।
आसीदुचथ्यभार्या तु ममता नाम भार्गवी ॥११॥

तां कनीयान्बृहस्पतिर् मैथुनायोपचक्रमे ।
शुक्रस्योत्सर्गकाले तु गर्भस्तं प्रत्यभाषत ॥१२॥
इहास्मि पूर्वसंभूतो न कार्यः शुक्रसंकरः ।
तच्छुक्रप्रतिषेधं तु न ममर्ष बृहस्पतिः ॥१३॥
स व्याजहार तं गर्भं तमस्ते दीर्घमस्त्विति ।
स च दीर्घतमा नाम बभूवर्षिरुचथ्यजः ॥१४॥
स जातोऽभ्यतपद्देवान् अकस्मादन्धतां गतः ।
ददुर्देवास्तु तच्चक्षुस्ततोऽनन्धो बभूव सः ॥१५॥ 3॥
स वेदिषद् इत्यस्तौच् चतुर्भिर्जातवेदसम् ।
समिद्ध आप्रियोऽन्यैन्द्री तमित्यग्नेः पराणि षट् ॥१६॥
स्तुतौ तु मित्रावरुणौ सूक्तैर्मित्रमिति त्रिभिः ।
मित्रं मैत्रीं वदत्येताम् आ धेनवश्च शंसति ॥१७॥
अदितिं वाथवाप्यग्निं तथा रूपं हि दृश्यते ।
अग्निं मेनेऽदितिं त्वेव कुत्से चेह च शौनकः ॥१८॥
ऋषिरच प्रसङ्गाद्वा दर्शनाद्वानुकीर्तयेत् ।
विष्णोर्नु कमिति त्रीणि वैष्णवानि पराण्यतः ॥१९॥
प्र वश्च तिसृभिर्ऋग्भिर् इन्द्राविष्णू सह स्तुतौ ।
गृहाणि वा वैष्णवानि ता वामित्यृचि काङ्क्षति ॥२०॥ 4॥
जीर्णं तु दीर्घतमसं खिन्नास्तत्परिचारिणः ।
दासा बद्ध्वा नदीतोये दृष्टिहीनमवादधुः ॥२१॥
तत्रैकस्त्रैतनो नाम शस्त्रेणैनमपाहनत् ।
शिरश्चांसावुरश्चैव स्वयमेव न्यकृन्तत ॥२२॥
B हत्वा दीर्घतमास्तं तु पापेन महता वृतम् ।
B आत्माङ्गान्यनुदश्चैव तत्रोदोन्मोहितो भृशम् ॥२३॥
अङ्गदेशसमीपे तु तं नद्यः समुदक्षिपन्* ।

Bअङ्गराजगृहे युक्ताम् उशिजं पुत्रकाम्यया ॥२४॥
Bराज्ञा च प्रहितां दासीं भक्तां मत्वा महातपाः ।
जनयामास चोत्थाय कक्षीवत्प्रमुखानृषीन् ॥२५॥ ५॥
तुष्टाव चैव सूक्ताभ्याम् अबोधीत्यश्विनावृषिः ।
प्रेति द्यावापृथिव्यौ तु पराभ्यामेतदुत्तरम् ॥२६॥
किमार्भेवं परे मा नो मेध्यस्याश्वस्य संस्तवः ।
ईर्मान्तास इति त्वस्यां नीयमानं प्रशंसति ॥२७॥
स्वयूथ्यास्तस्य चैवात्र बहवः संस्तुता हयाः ।
नियुक्ताश्चानियुक्ताश्च प्रसङ्गादनुकीर्तिताः ॥२८॥
संज्ञप्तवदसंज्ञप्तं भविष्यं चाह भूतवत् ।
तस्य मांसस्य सूनस्य चरूणां हविषस्तथा ॥२९॥
वासोऽधिवाससोश्चात्र यद्विशस्यं च कीर्तितम् ।
गात्रस्य शूलस्थूणानां स्वधितेश्च प्रकीर्तनम् ॥३०॥ ६॥
छागस्य कीर्तनं चात्र इन्द्रापूष्णोः सह स्तुतिः ।
सूक्तं यदस्यवामीयं वैश्वदेवं तदुच्यते ॥३१॥
प्रवादा विविधास्तत्र देवानां चात्र कीर्तनम् ।
Bसूक्तेऽस्यर्चि परोक्षोक्ता वक्ष्यामि *भ्रातरस्त्रयः ॥३२॥
अग्निस्तु वामः पलितो वायुर्भ्राता तु मध्यमः ।
घृतपृष्ठस्तृतीयोऽत्र सप्त वै रश्मय स्तुताः ॥३३॥
परास्तु कथयन्त्यग्निं यथा वर्षति पाति च ।
अहोरात्रान्दिनान्मासान् ऋतूंश्च परिवर्तिनः ॥३४॥
पञ्चधा च त्रिधा चैव षोढा द्वादशधैव च ।
संवत्सरं चक्रवच्च पराभिः कीर्तयत्यृषिः ॥३५॥ ७॥
क्षेत्रज्ञानं च धेनुं च गौरीं वाचं सरस्वतीम् ।
धर्मं पूर्वयुगीयं च साध्यान्देवगणांस्तथा ॥३६॥

विविधानि च कर्माणि अग्निवायुविवस्वताम् ।
विभूतिमग्नेर्वायोश्च जगति स्था*स्नुजङ्गमे ॥३७॥
हरणं रश्मिभिर्वारो विसर्गं पुनरेव च ।
कर्मानुकीर्तनं चाथ पर्जन्याग्निविवस्वताम् ॥३८॥
मातापुत्रौ तु वाक्प्राणौ माता वागितरः सुतः ।
सरस्वन्तमिति प्राणं वाचं प्राहुः सरस्वतीम् ॥३९॥
शरीरमिन्द्रियैर्युक्तं क्षेत्रमित्यभिधीयते ।
वेद तत्प्राण एवैकस् तस्मात्क्षेत्रज्ञ उच्यते ॥४०॥ ८॥
B मेघे शकस्तस्य धूमः सलिलं वास एव वा ।
B सोम उक्षा भवन्त्यस्य पावकाश्च वयोऽधिपाः ॥४१॥
B गौरीरन्तं वैश्वदेवम् उपरि स्यात्पृथक्स्तुतिः ।
B इन्द्रं मित्रमिमे सौर्यौ सौरी वान्त्या सरस्वते ॥४२॥
A सूक्तमल्पस्तवं त्वेतज् ज्ञानमेव प्रशंसति ।
A प्रवादबहुलत्वाच्च ततः सलिलमुच्यते ॥४३॥
मारुतेन्द्रस्तु संवादः कयेति परमः स्मृतः ।
मरुतामयुजस्त्वैन्द्र्यो युग्माः सर्वाः सहान्त्यया ॥४४॥
एकादशी प्रथमा च मारुतस्तृच उत्तरः ।
B तृचस्यैव तु तत्रोक्तं कर्तृत्वमितरस्य तु ॥४५॥
B इतिहासः* पुरावृत्त ऋषिभिः परिकीर्त्यते ।
समागच्छन्मरुद्भिस्तु चरन्व्योम्नि शतक्रतुः ॥४६॥
दृष्ट्वा तुष्टाव तानिन्द्रस् ते चेन्द्रमृषयोऽब्रुवन् ।
तेषामगस्त्यः संवादं तपसा वेद तत्त्वतः ॥४७॥
स तानभिजगामाशु निरुप्येन्द्रं हविस्तदा ।
मरुतश्चाभितुष्टाव सूक्तैस्तन्विति च त्रिभिः ॥४८॥ ९॥
महश्चिदिति चैवेन्द्रं सहस्रमिति चैतया ।

निरूप्तं तद्धविश्चैन्द्रं मरुद्भ्यो दातुमिच्छति ॥४९॥
विज्ञायावेक्ष्य तद्भावम् इन्द्रो नेति तमब्रवीत् ।
न श्वो नाद्यतनं ह्यस्ति वेद कस्तद्यदद्भुतम् ॥५०॥
कस्यचित्त्वर्थसंचारे चित्तमेव विनश्यति ।
किं न इत्यब्रवीदिन्द्रम् अगस्त्यो भ्रातरस्तव ॥५१॥
मरुद्भिः संप्रकल्पस्व वधीर्मा नः शतक्रतो ।
किं नो भ्रातरिति त्वस्याम् इन्द्रो मान्यमुपालभत् ॥५२॥
अगस्त्यस्त्वरमित्यस्यां क्षुब्धमिन्द्रं प्रशामयत् ।
प्रादात्संवननं कृत्वा तेभ्य एव च तद्धविः ॥५३॥ १०॥
सुते चकार सोमेऽथ तानिन्द्रः सोमपीथिनः ।
तस्माद्विद्यान्निपातेन ऐन्द्रेषु मरुत स्तुतान् ॥५४॥
प्रीतात्मा पुनरेवर्षिस् तांस्तुष्टाव पृथक्पृथक् ।
मरुतः प्रति सूक्ताभ्याम् इन्द्रं षड्भिः परैस्तु सः ॥५५॥
B स्तुतश्चतसृभिश्चेन्द्र स्तुतास इति तैः सह ।
B मरुद्भिः सह यत्रेन्द्रो मरुत्वांस्तत्र सोऽभवत् ॥५६॥
ऋतौ स्नातामृषिर्भार्यां लोपमुद्रां यशस्विनीम् ।
उपजल्पितुमारेभे रहःसंयोगकाम्यया ॥५७॥ ११॥
द्वाभ्यां सा त्वब्रवीदृग्भ्यां पूर्वीरिति चिकीर्षितम् ।
रिरंसुस्तामथागस्त्य उत्तराभ्यामतोषयत् ॥५८॥
विदित्वा तपसा सर्वं तयोर्भावं रिरंसतोः ।
श्रुत्वैनः कृतवानस्मि ब्रह्मचार्युत्तमे जगौ ॥५९॥
प्रशस्य तं परिष्वज्य गुरू मूर्ध्न्यवजघ्रतुः ।
स्मित्वैनमाहतुश्चोभाव् अनागा असि पुत्रक ॥६०॥
युवो रजांसीति ततः सूक्तैः पञ्चभिरश्विनौ ।
अगस्त्य एव तुष्टाव कतरेति परेण तु ॥६१॥

द्यावापृथिव्यौ सूक्तेन आ नो विश्वान्दिवौकसः ।
पितुमन्नं समिद्धाग्न्यो अग्निमग्ने नयेति च ॥ ६२॥
बृहस्पतेरनर्वाणं कङ्कतोपनिषत्परम् ।
अपां तृणानां सूर्यस्य केचिदेतां स्तुतिं विदुः ॥ ६३॥
ददर्श तदगस्त्यो वा विषघ्नं विषशङ्कया ।
अदृष्टाख्यो नष्टरूपः सूक्तस्यान्त्योऽत्र तु त्रृचः ॥ ६४॥ १२॥

RV. ii. अस्तौद्गृत्समदोऽग्निं त्वं जातवेदस्यमाग्नियः ।
यज्ञेनाथ समिद्धोऽग्निर् अतोऽग्निं सप्तभिर्हुवे ॥ ६५॥
संयुज्य तपसात्मानम् ऐन्द्रं बिभ्रन्महद्वपुः ।
अदृश्यत मुहूर्तेन दिवि च व्योम्नि चेह च ॥ ६६॥
तमिन्द्रमिति मत्वा तु दैत्यौ भीमपराक्रमौ ।
धुनिश्च चुमुरिश्चोभौ सायुधावभिपेततुः ॥ ६७॥
विदित्वा स तयोर्भावम् ऋषिः पापं चिकीर्षतोः ।
यो जात इति सूक्तेन कर्माण्यैन्द्राण्यकीर्तयत् ॥ ६८॥
उक्तेषु कर्मस्वैन्द्रेषु भीस्तावाशु विवेश ह ।
इदमन्तरमित्युक्त्वा ताविन्द्रस्तु निबर्हयत् ॥ ६९॥ १३॥
निहत्य तौ गृत्समदम् ऋषिं शक्रोऽभ्यभाषत ।
यथेष्टं मां सखे पश्य प्रियत्वं ह्यागतोऽसि मे ॥ ७०॥
वरं गृहाण मत्तस्त्वम् अक्षयं चास्तु ते तपः ।
प्रहृष्टः प्रत्युवाचर्षिर् अस्माकं वदतां वर ॥ ७१॥
तनूनामस्तु चारिष्टिर् वाक् चास्तु हृदयंगमा ।
सुवीरा रयिमन्तश्च वयं त्वामिन्द्र धीमहे ॥ ७२॥
इन्द्र त्वां च विजानीमो वयं जन्मनि जन्मनि ।
त्वद्गतश्चैष मे भावो मापगास्त्वं रथीतरः ॥ ७३॥

B निरुक्तं तदिदं वार्यम् इन्द्र श्रेष्ठान्यृचान्यया ।
B वव्रे वरमिदं सर्वं तदाकर्ण्य शचीपतिः ॥७४॥ १४॥
तथेत्युक्त्वा तुराषाट् तु पाणौ जग्राह दक्षिणे ।
ऋषिञ्चास्य सखित्वेन पाणिना पाणिमस्पृशत् ॥७५॥
सहितौ जग्मतुश्चैवं महेन्द्रसदनं प्रति ।
तत्रैनमार्हयत्प्रीत्या स्वयमेव पुरंदरः ॥७६॥
कर्मणा विधिदृष्टेन तमृषिं चाभ्यपूजयत् ।
सखित्वाच्च पुनश्चैनम् उवाच हरिवाहनः ॥७७॥
गृणन्मादयसे यस्मात् त्वमस्मानृषिसत्तम ।
तस्माद्गृत्समदो नाम शौनहोत्रो भविष्यसि ॥७८॥
ततो द्वादशभिः सूक्तैस् तुष्टावेन्द्रं श्रुधीत्यृषिः ।
ददर्श संस्तुवन्नेव तत्र स ब्रह्मणस्पतिम् ॥७९॥ १५॥
बृहस्पतिं तु तुष्टाव दृष्टलिङ्गाभिरेव च ।
स तमप्यभितुष्टाव चतुर्भिरित उत्तरैः ॥८०॥
गणानां विश्वमित्यस्यां सहेन्द्राब्रह्मणस्पती ।
बृहस्पतिं प्रसङ्गाद्वा ब्रह्मणस्पतिमेव च ॥८१॥
A तुष्टाव कर्मणैकेन प्रभावस्यान्तरं द्वयोः ।
मित्रावरुणदक्षांशतुविजातभगार्यम्णाम् ॥८२॥
आदित्यानामिमाः सूक्तम् इदं वारुणमुच्यते ।
वारुणी यो म इत्याद्या दुःस्वप्नाद्यप्रणाशिनी ॥८३॥
धृतव्रता वैश्वदेवम् ऋतमैन्द्रं परं तु यत् ।
प्र हि क्रतुमिति त्वस्याम् इन्द्रासोमौ सह स्तुतौ ॥८४॥
सरस्वति त्वमित्यस्मिन्न् अर्धर्चे मध्यमा तु वाक् ।
बृहस्पतिस्तुतिर्यो नस् तं व* ऋङ् मरुतां स्तुतिः ॥८५॥ १६॥
अस्माकं वैश्वदेवं स्याद् आदावस्येति चास्य ऋक् ।

द्यावापृथिव्योस्त्वाद्यौ वा अथवैन्द्र्यौ परे ततः ॥८६॥
द्वे द्वे राकासिनीवाल्योः षड् शुक्राद्यास्तथान्यया ।
Bतत्पूर्वे द्वे ऋचौ कुह्वाः कुहूमहमिति स्मृते ॥८७॥
Bतदुत्तरे द्वेऽनुमतेर् अनु नोऽन्विदिति स्मृते ।
Bधातुश्चतस्रस्तत्रादौ धाता ददातु नो रयिम् ॥८८॥
रौद्रं मारुतं तु परम् आ ते धारावरा इति ।
वामतस्तु मृगं दृष्ट्वा बिभ्यदेत्य ऋषिः स्वयम् ॥८९॥
स्तुहि श्रुतमिति त्वस्यां तमेवास्तौत्प्रसादयन् ।
अपां नपादुपेत्यच स्तुतः सूक्ते ततः परे ॥९०॥ १७॥
तुभ्यमित्यार्तवे सूक्ते सावित्रादाश्विनं परम् ।
सोमः पूषादितिश्चैव सोमापौष्णेऽन्यया स्तुताः ॥९१॥
वायव्ये चैन्द्रवायवी पञ्चाथ प्राउगास्तृचाः ।
प्रेत्यृक्स्तौति हविर्धाने अग्निस्तत्र निपातभाक् ।
द्यावापृथिव्यौ द्यावेति हविर्धाने ततः परे ॥९२॥
स्तुतिं तु पुनरेवेछन् इन्द्रो भूत्वा कपिञ्जलः ।
ऋषेर्जिगमिषोराशां ववाशास्थाय दक्षिणाम् ॥९३॥
स तमार्षेण संप्रेक्ष्य चक्षुषा पक्षिरूपिणम् ।
पराभ्यामभितुष्टाव सूक्ताभ्यां तु कनिक्रदत् ॥९४॥ १८॥

RV. iii. प्रशास्य गां यस्तपसाभ्यगछद् ब्रह्मर्षितामेकशतं च पुत्रान् ।
स गाथिपुत्रस्तु जगाद सूक्तं सोमस्य मेत्याग्नेयं यत्परे च ॥९५॥
वैश्वानरीये* समित्समिदाग्न्यो द्वे आग्नेये उत्तरे त्वत्र सूक्ते ।
द्यावापृथिव्या उषसो निपाता आपोऽथ देवाः पितरश्च मित्रः ॥९६॥
आग्नेयेषु दृश्यन्ते स्तुतास्तु वैश्वानरो वरुणो जातवेदाः ।
स्तूयतैको यत्र यत्रास्तुतिर्वा निपात्यर्थाश्चोपमार्थाश्च विद्यात् ॥९७॥

राजर्षयो गृत्समदा वसिष्ठा भरद्वाजाः कुशिका गोतमाश्च ।
विश्वेऽश्विनावङ्गिरसोऽत्रयोऽदितिर् भोजाः कण्वा भृगवो रोदसी
दिशः ॥९८॥
सावित्रसौम्याश्विनमारुतेषु ऐन्द्राग्नेये रौद्रसौर्यौषसेषु ।
आदावन्ते सूक्तमध्ये स्तुतास्तु न व्याघ्नन्ति देवताः सूक्तभाजः ॥९९॥ १९॥
अग्नेः सप्तदशोऽध्याय ऊर्ध्व ऊ षु ण ऊतये ।
एते काण्व्यावृचौ यौप्याव् अञ्जन्ति त्वेति पञ्च च ॥१००॥
शेषा बहुभ्यो यूपेभ्यो वैश्वदेवी त्वृगष्टमी ।
अस्यान्या व्रश्चनी योक्ता षष्ठमैन्द्राग्नमुच्यते ॥१०१॥
अग्निमुषसं वैश्वदेवी दधिक्रामिति चेतया ।
आग्नेन्द्री त्वग्न इन्द्रश्चर्क् परो वैश्वानरस्तृचः ॥१०२॥
प्र यन्तु मारुतश्चान्या शतधारं गुरुस्तवः ।
प्र वो वाजा ऋतूंस्तौति ऋत्विज स्तौति मन्यत ॥१०३॥
पुरीष्यास इति त्वस्यां धिष्ण्यानग्नीन्प्रशंसति ।
ज्ञेयाश्चैव तु होतारस् ते दैव्याश्चैव तत्र तु ॥१०४॥ २०॥
त्रयोविंशतिरैन्द्राणि इच्छन्तीति पराण्यतः ।
सूक्ते प्रेति तु नद्यश्च विश्वामित्रः समूदिरे ॥१०५॥
पुरोहितः सन्निज्यार्थे सुदासा सह यन्नृषिः ।
विपाट्छुतुद्योः संभेदं शमित्येते उवाच ह ॥१०६॥
प्रवादास्तत्र दृश्यन्ते द्विवद्बहुवदेकवत् ।
अच्छेत्यर्धर्चे पच्छो वा नदीष्वप्येकवन्नि ते ॥१०७॥
आद्ये तृचे द्विवत्सार्धे विश्वामित्रवचः श्रुतेः ।
एताभिर्ऋग्भिर्वा नद्य ऋषिं बहुवदूचिरे ॥१०८॥
षष्ठ्याष्टम्या चतुर्थ्या च दशम्या चेतरा ऋषेः ।
सप्तम्यामृचि षष्ठ्यां च गौ देवौ परिकीर्तितौ ॥१०९॥ २१॥

निपातिनौ तु तौ ज्ञेयौ ऐन्द्रापार्वत्यृगुत्तमे ।
करोति पुत्रिकां नाम यथा दुहितरं तथा ॥११०॥
तस्यां सिञ्चति रेतो वा तच्छासदिति कीर्तितम् ।
रिक्थस्य दुहितुर्दानं नेत्यृचि प्रतिषिध्यते ॥१११॥
तस्याश्चाह यवीयांसं भ्रातरं ज्येष्ठवत्सुतम् ।
सुदासश्च महायज्ञे शक्तिना गाथिसूनवे ॥११२॥
निगृहीतं बलाच्चेतः सोऽवसीदद्विचेतनः ।
तस्मै ब्राह्मीं तु सौरीं वा नाम्ना वाचं ससर्परीम् ॥११३॥
सूर्यक्षयादिहाहृत्य ददुस्ते जमदग्नयः ।
कुशिकानां ततः सा वाग् अमतिं तामपाहनत् ॥११४॥ २२॥
उपेति चास्यां कुशिकान् विश्वामित्रोऽ*नुबोधयत् ।
लब्ध्वा वाचं च हृष्टात्मा तानृषीन्प्रत्यपूजयत् ॥११५॥
ससर्परीरिति द्वाभ्याम् ऋग्भ्यां वाचं स्तुवन्स्वयम् ।
स्थिरावित्यनसोऽङ्गान्यनडुहश्च गृहान्व्रजन् ॥११६॥
ततश्च स्वशरीरेण गृहान्गच्छन्परीद्दे ।
पराश्चतस्रो यास्त्वत्र वसिष्ठद्वेषिण्यः स्मृताः ॥११७॥
विश्वामित्रेण ताः प्रोक्ता अभिशापा इति स्मृताः ।
द्विषद्द्वेषास्तु ताः प्रोक्ता विद्याश्चैवाभिचारिकाः ॥११८॥ २३॥
वसिष्ठास्ता न शृण्वन्ति तदाचार्यकसंमतम् ।
कीर्तनाच्छ्रवणाद्वापि महादोषश्च जायते ॥११९॥
शतधा भिद्यते मूर्धा कीर्तितेन श्रुतेन वा ।
तेषां बालाः प्रमीयन्ते तस्मात्तास्तु न कीर्तयेत् ॥१२०॥
विश्वांश्च देवांस्तुष्टाव चतुर्भिरिममित्यृषिः ।
B अस्तौद्विश्वात्मना सर्वान् मन्यमानः परं पदम् ॥१२१॥
B देवानामसुरत्वं तद् एकं महदितीरयन् ।

अश्विनौ मित्र ऋभवो धेनुर्मित्र इहेह वः ॥१२२॥
A वैश्वदेवीति विज्ञेया मैत्री मित्राय पञ्च तु ।
ऐन्द्रार्भवस्तृचस्त्वत्र आर्भवे सूक्त उत्तमः ॥१२३॥ २४॥
B पूर्वे त्वृचे निपातीन्द्र उषो वाजेन पञ्चमात् ।
औषसादुत्तरास्त्वन्ये षट् पृथग्देवतास्तृचाः ।
ऐन्द्रावरुणः प्रथमो बार्हस्पत्यस्तथापरः ॥१२४॥
पौष्णसावित्रसौम्याश्च मैत्रावरुण उत्तमः ।
तुष्टाव जमदग्निश्च तेन देवावृतावृधौ ॥१२५॥ २५॥

RV. iv. देवर्षिपितृपूजार्थं पपाचान्त्राणि यश्शुनः ।
यस्य वै श्येनरूपेण आहरद्वृत्रहा मधु ॥१२६॥
सोऽग्निं तु पञ्चदशभिर् इन्द्रं षोडशभिः परैः ।
ऋषिस्त्वामिति तुष्टाव सूक्तैरेति तु गौतमः ॥१२७॥
स भ्रातरमिति त्वासु तिसृष्वग्निर्निपातभाक् ।
वरुणेनाभिसंस्तौति आहुरन्ये निपातिनम् ॥१२८॥
लिङ्गोक्तदैवते सूक्ते एके प्रत्यग्निरेव तु ।
ऋषिर्बोधदिति द्वाभ्यां स्तौति सोमकमेव तु ॥१२९॥ २६॥
तस्यैव चायुषोऽर्थाय पराभ्यामश्विनौ स्तुतौ ।
अञ्जसा न जनिष्येऽहं ब्रुवाणं गर्भमेव तु ॥१३०॥
अन्वशाददितिः पुत्रम् इन्द्रमात्महितैषिणी ।
स जातमात्रो युद्धाय ऋषिमेवाजुहाव तु ॥१३१॥
योधयन्वामदेवस्तं कृत्वात्मनि बलं तथा ।
दिनानि दश रात्रीश्च विजिग्ये चैनमोजसा ॥१३२॥
स तं क इममित्यस्यां विक्रीणन्नृषिसंसदि ।
स्वयं तेनाभितुष्टाव नकिरिन्द्रेति गौतमः ॥१३३॥

किमादुतासीति चास्यां मन्युमर्थे पराणुदत् ।
अथास्य रूपवीर्याणि धैर्यकार्याणि तान्यृषिः ॥१३४॥ २७॥
विविधानि च कर्माणि प्रशंसादितये तथा ।
अहमित्यात्मसंस्तावस् तृचे स्तुतिरिवास्य हि ॥१३५॥
प्र सु ष विभ्यो नवभिर् ऋग्भिः श्येनस्य संस्तवः ।
पराभिस्त्वेति पञ्चर्चे सोमेनेन्द्र स्तुतः सह ॥१३६॥
सोमप्रधानामेतां तु कौत्सुकिर्मन्यते स्तुतिम् ।
दिवश्चिदिति चैतेन तृचेनेन्द्रेण संस्तुताम् ॥१३७॥
उषसं मध्यमां मेने आचार्यः शाकटायनः ।
वाममृचि स्तुताश्चात्र भगः पूषेति चार्यमा ॥१३८॥
B करूळतीति पूषोक्तोऽदन्तकः स इति श्रुतेः ।
B अस्माकमुत्तमं सूर्यं स्तौतीत्याहाश्वलायनः ॥१३९॥ २८॥
इन्द्रस्य हरयो ह्यश्वा अग्नेरश्वास्तु रोहितः ।
सूर्यस्य हरितश्चैव वायोर्नियुत एव च ॥१४०॥
रासभः सहितोऽश्विभ्याम् अजाः पूष्णश्च वाजिनः ।
पृषत्योऽश्वास्तु मरुतां गावोऽरुण्यस्तथोषसाम् ॥१४१॥
सवितुर्वाजिनः श्यावा विश्वरूपा बृहस्पतेः ।
संहते देवताभिस्तु स्तूयन्तेऽप्यल्पशोऽन्यथा ॥१४२॥
आयुधं वाहनं चापि स्तुतौ यस्येह दृश्यते ।
तमेव तु स्तुतं विद्यात् तस्यात्मा बहुधा हि सः ॥१४३॥
कनीनका सूक्तशेषो हर्यो स्तुतिरिहोच्यते ।
चत्वार्येतश्च विज्ञेयान्य् अप्रगृह्याणि विद्रधे ॥१४४॥
अप्रगृह्याणि विद्रधे ॥ २९॥

॥ इति बृहद्देवतायां चतुर्थोऽध्यायः ॥

प्रेति पञ्चार्भवं त्रीणि दाधिक्राणि पराण्यतः ।
ऋग्द्यावापृथिव्यौ स्तौति दाधिक्राणां मुखे तु या ॥१॥
परोक्षैरमुतो वाग्भिर् नामभिश्च स्तुतास्त्रयः ।
अग्निर्वायुश्च सूर्यश्च हंसः शुचिषदित्यृचि ॥२॥
B नियुक्ता सूर्यदेवत्या हंस इत्यैतरेयके ।
द्वे त्वैन्द्रावरुणे सूक्ते ततस्त्रीण्याश्विनानि कः ॥३॥
अयं वायो विहीत्येषु* वायव्याः सप्त कीर्तिताः ।
नव चैवैन्द्र*वायव्या इन्द्रस्तिस्रः शतेन षट् ॥४॥
इदं कथिततदेवत्यं यस्तस्तम्भोत्तमो तृचः ।
स्तुतिरिन्द्राबृहस्पत्योर् अष्टावेता ऋचः स्मृताः ॥५॥
सूक्तं तु तद्बार्हस्पत्यम् इदमित्यौषसे परे ।
पुरोधातुः कर्मशंसा स इद्राजोच्यते तृचे ॥६॥ १॥
तासाविचे द्वे तु को वैश्वदेवं मही द्यावापृथिवीयं परं तु यत् ।
क्षेत्रस्येति तिस्रस्तु क्षेत्रपत्याः शुनं वाहाः शुनदेवी त्वृगुत्तरा ॥७॥
वायुः शुनः सूर्य एवात्र सीरः शुनासीरौ वायुसूर्यौ वदन्ति ।
शुनासीरं यास्क इन्द्रं तु मेने सूर्येन्द्रौ तौ मन्यते शाकपूणिः ॥८॥
शुनासीरौ पञ्चम्यां तु स्तुतौ तौ द्वे तु सीतायै षष्ठी सप्तमी च ।
शुनं नः फालाः कृषिं स्तौति पादः शुनं कीनाशाः कृषिजीवान्मनुष्यान् ॥९॥
स्तुतः पादेऽत्र पर्जन्यस्तृतीये अन्त्यं* त्वृषिर्धनकामो जगाद ।
कृषिं वा स्तौति सर्वं हि सूक्तं समुद्रादित्यग्नेर्मध्यमस्य ॥१०॥
आदित्यं वा ब्राह्मणोक्तं प्रदिष्टम् आग्नेयं वाप्याज्यसूक्तं हि दृष्टम् ।
अपां स्तुतिं वा यदि वा घृतस्तुतिं गव्यमेके सौर्यमेतद्वदन्ति ॥११॥ २॥

RV. v. स्वर्भानुदृष्टं सूर्यस्य अपहत्य तमोऽत्रयः ।
सप्तविंशतिभिः सूक्तैर् अबोधीत्यग्निमस्तुवन् ॥१२॥
त्रैवृष्णस्त्रसदस्युश्च अश्वमेध त्र्यरुणंचयः ।
स्तूयमानाः परीक्ष्याः स्युर् अभिष्वेते क्वचित्क्वचित् ॥१३॥
ऐक्ष्वाकुस्त्र्यरुणो राजा त्रैवृष्णो रथमास्थितः ।
संजग्राहाश्वरश्मींश्च वृशो जानः पुरोहितः ॥१४॥
स ब्राह्मणकुमारस्य रथो गच्छञ्छिरोऽच्छिनत् ।
एनस्वीत्यब्रवीच्चैव स राजैनं पुरोहितम् ॥१५॥
सोऽथर्वाङ्गिरसान्मन्त्रान् दृष्ट्वा संजीव्य तं शिशुम् ।
क्रोधात्संत्यज्य राजानम् अन्यदेशं समाश्रितः ॥१६॥
हरोऽप्यग्नेर्ननाशास्य तस्यापक्रमणादृषेः ।
अग्नौ प्रास्तानि हव्यानि न ह्यपच्यन्त कानिचित् ॥१७॥ ३॥
ततः प्रव्यथितो राजा सोऽभिगम्य प्रसाद्य तम् ।
आनीत्वा स वृशं जानं पुनरेव पुरोदधे ॥१८॥
स प्रसन्नो वृशोऽन्वैच्छद् धरमग्नेर्नृपक्षये ।
अविन्दत पिशाचीं तां जायां तस्य च भूपतेः ॥१९॥
निषण्णः स तया सार्धम् आसन्द्यां कशिपावपि ।
तामुपामन्त्रयां चक्रे कमेतं त्वमिति त्र्यृचा ॥२०॥
हरः कुमाररूपेण ब्रुवंस्तामभ्यभाषत ।
विज्योतिषेति चोक्तायां सहसाग्निरुदज्वलत् ॥२१॥
B सहमानः समायान्तं प्रकाशं च प्रकाशयन् ।
पिशाचीमदहत्तां स यत्र चोपविवेश सा ॥२२॥ ४॥
एष एव परामृष्टो भाल्लविब्राह्मणे त्र्यृचः ।
B निदानसंज्ञके ग्रन्थे छन्दोगानामिति श्रुतिः ॥२३॥
भवेदेव परामर्शः सूक्तस्यास्य व्यपेक्षया ।

भवन्ति बाह्या* मन्त्रा हि विधिदृष्टेन चोदिताः ॥२४॥
दृश्यन्ते ब्राह्मणे मन्त्रा एकदेशे प्रदर्शिताः ।
जामदग्न्यस्तथैवाप्य स्तोकीयाश्चैतरेयके ॥२५॥
आप्रियः सुसमिद्धाय पञ्चमं सूक्तमत्र तु ।
एदमृग्वैश्वदेवी वा अन्त्या चैन्द्राग्न्युपोत्तमे ॥२६॥
ऐन्द्राणि द्वादश त्रीति उशना तत्र संस्तुतः ।
उशनेति तु पादेन सं ह यद्वामनेन च ॥२७॥ ५॥
इन्द्राकुत्सेति चैतस्यां कुत्सेनेन्द्र स्तुतः सह ।
यत्त्वा सूर्येति चात्रीणां पञ्चर्चे कर्म कीर्त्यते ॥२८॥
B अनस्वन्तेति सूक्तेऽस्मिन् आग्नेयेऽत्रिर्ऋषिः स्वयम् ।
B दानतुष्टः शशंसैतान् राजर्षीनिति केचन ॥२९॥
B आशीरध्येषणाश्चैभ्यो अग्निं प्रति च दृश्यते ।
B अयुतं च गवां त्रीणि शतान्यथ च विंशतिम्* ॥३०॥
B सौवर्णं शकटं गोभ्यां त्र्यरुणोऽदान्नृपोऽत्रये ।
B अश्वमेधः शतं चोक्ष्णां त्रसदस्युर्धनं बहु ॥३१॥ ६॥
B राज्ञः प्रति च तत्सूक्तं बभाष इति केचन ।
B आत्मा हि नात्मने दद्याद् अग्रहीन्नृपतेर्ऋषिः ॥३२॥
B अत्रेः सुतमृषिं बभ्रुम् आर्त्विज्याय ऋणंचयः ।
B सहस्रदक्षिणे सोमे वव्रे तं सोऽप्ययाजयत् ॥३३॥
B ददौ च* रौशमो* राजा सहस्राणि शतानि च ।
B तस्मै चत्वारि चत्वारि महावीरं च काञ्चनम् ॥३४॥
B प्रवर्ग्येषु महावीराः सौवर्णास्तस्य चाभवन् ।
B प्रतिगृह्य ऋषिर्गच्छन् मध्यमेनाग्निना पथि ॥३५॥
B पृष्ट इन्द्रेण चाचख्यौ भद्रं चतसृभिश्च तत् ।
को नु वां वैश्वदेवानि एकादश पराण्यतः ॥३६॥ ७॥

मारुतानि दश प्रेति इळाभीत्यृचि तु स्तुता ।
Bउदित्यृचि तृतीयायां सविता शौनकोऽब्रवीत् ॥३७॥
उपेति बार्हस्पत्यस्तु* तृचो मारुत्यृगुत्तरा ।
तमु ष्टुहीति रौद्री तु प्र सुष्टुतिरिति त्वृचि ॥३८॥
Bशौनकादिभिराचार्यैर् देवता बहुधेरिता ।
इळस्पतिं* शाकपूणिः पर्जन्याग्नी तु गालवः ॥३९॥
यास्कस्तु पूषणं मेने स्तुतमिन्द्रं तु शौनकः ।
वैश्वानरं भागुरिस्तु मारुत्येष समाश्विनी ॥४०॥
वायव्याध्वर्यवः सौमी दशेत्यैन्द्री परा तु या ।
Bअग्निं घर्मं पराजन्ति अश्विनौ स्तौत्यृगछ च ॥४१॥ ८॥
Bप्रेति वायुं* पूषणं च अर्धर्चेऽग्निरिहोच्यते ।
Bप्रथमेऽथ द्वितीये च स्तुता एति दिवौकसः ॥४२॥
आ वाचं मध्यमां स्तौति ततोऽन्या तु बृहस्पतिम् ।
Bज्यायांसमिति चादित्यं प्र वो वायुरिहोच्यते ॥४३॥
Bतं प्रत्नथेति सौमी वा दैष्यैन्द्री वा प्रजापतेः ।
Bपरोक्षवैश्वदेवं तद् आह कौषीतकिः स्वयम् ॥४४॥
Bतेषु तृतीयमित्युक्तं देवान्हुव इदं परम् ।
देवानां पत्नीरिति तु देवपत्न्यो ह्यृचे स्तुताः ॥४५॥ ९॥
अयं चतुर्णामिति चेन्द्रवायू त्रिभि स्तुतौ वायवा याहि वायुम् ।
रथं त्वृचा रोदसी स्तूयतेऽत्र यस्या स्तुता मरुतो रुद्रपत्न्याः ॥४६॥
आ रुद्रास इति त्वस्यां रुद्राणां संस्तुतो गणः ।
मरुतां तु गणस्यैतन् नाम रुद्रा इति स्मृताः ॥४७॥
असावग्निरयं चोभाव् अमी पार्थिवमध्यमौ ।
अग्ने मरुद्भिरित्यस्यां मरुद्भिः सह संस्तुतौ ॥४८॥
Bमध्यमा वाक् स्त्रियः सर्वाः पुमान् सर्वेषु* मध्यमः ।

B गणाश्च सर्वे मरुतो गुणभेदात्पृथक् पृथक् ॥४९॥ १०॥
राजर्षिरभवद्दार्भ्यो रथवीतिरिति श्रुतः ।
स यक्ष्यमाणो राजाचिम् अभिगम्य प्रसाद्य च ॥५०॥
आत्मानं कार्यमर्थं च ख्यापयन्प्राञ्जलि स्थितः ।
अवृणीतर्षिमात्रेयम् आर्त्विज्यायार्चनानसम् ॥५१॥
स सपुत्रोऽभ्यगच्छत्तं राजानं यज्ञसिद्धये ।
श्यावाश्वश्चात्रिपुत्रस्य पुत्रः खल्वर्चनानसः ॥५२॥
साङ्गोपाङ्गान्सर्ववेदान् यः पित्राध्यापितो मुदा ।
अर्चनानाः सपुत्रोऽथ गत्वा नृपमयाजयत् ॥५३॥
यज्ञे च विततेऽपश्यद् राजपुत्रीं यशस्विनीम् ।
स्नुषा मे राजपुत्री स्याद् इति तस्य मनोऽभवत् ॥५४॥
श्यावाश्वस्य च तस्यां वै सक्तमासीत्तदा मनः ।
संयुज्यस्व मया राजन् इति याज्यं च सोऽब्रवीत् ॥५५॥ ११॥
B श्यवाश्वाय सुतां दित्सुर् महिषीं स्वां नृपोऽब्रवीत् ।
B किं ते मतमहं कन्यां श्यावाश्वाय ददामि हि ॥५६॥
B अत्रिपुत्रोऽदुर्बलो हि जामाता त्वावयोरिति ।
B राजानमब्रवीत्सापि नृपर्षिकुलजा ह्यहम् ॥५७॥
B नानृषिर्नौ तु जामाता नैष मन्त्रान् हि दृष्टवान् ।
B ऋषये दीयतां कन्या वेदस्यार्म्बा* भवेत्तथा ।
B ऋषि*र्मन्त्रदृशं वेदपितरं मन्यते यतः ॥५८॥
प्रत्याचष्टे स तं राजा सह संमन्त्र्य भार्यया ।
अनृषिर्नैव जामाता कश्चिद्भवितुमर्हति ॥५९॥
प्रत्याख्यात ऋषिस्तेन वृत्ते यज्ञे न्यवर्तत ।
श्यावाश्वस्य तु कन्याया मनो नैव न्यवर्तत ॥६०॥
ततस्तौ तु निवर्तेतां*म् उभावेवाभिजग्मतुः ।

B शशीयसीं तरन्तं च पुरुमीळ्हं च पार्थिवम् ॥६१॥
तरन्तपुरुमीळ्हौ तु राजानौ वैददश्व्यृषी ।
ताभ्यां तौ चक्रतुः पूजाम् ऋषिभ्यां नृपती स्वयम् ॥६२॥
ऋषिपुत्रं महिष्याश्च दर्शयामास तं नृपः ।
तरन्तानुमता चैव प्रादाद्बहुविधं वसु ॥६३॥ १२॥
अजाविकं गवाश्वं च श्यावाश्वाय शशीयसी ।
B ऋषिं याज्यार्चितौ गत्वा पितापुत्रौ स्वमाश्रमम् ॥६४॥
B अभ्यवादयतामृषिं महर्षिं दीप्ततेजसम् ।
B श्यावाश्वस्य मनस्यासीन् मन्त्रस्यादर्शनादहम् ॥६५॥
B न लब्धवानहं कन्यां हन्त सर्वाङ्गशोभनाम् ।
B अप्यहं मन्त्रदर्शी स्यां भवेद्धर्षो महान्मम ॥६६॥
B इत्यरण्ये चिन्तयतः प्रादुरासीन्मरुद्गणः ।
ददर्श संस्थितान्पार्श्वे तुल्यरूपानिवात्मनः ॥६७॥
समानवयसश्चैव मरुतो रुक्मवक्षसः ।
तांस्तुल्यवयसो दृष्ट्वा देवान्पुरुषविग्रहान् ॥६८॥
श्यावाश्वो विस्मितोऽपृच्छत् के ष्ठेति मरुतस्तदा ।
ततस्तु मरुतो देवान् रुद्रसूनूनबुध्यत ॥६९॥
य ईं वहन्त इत्याभिर् बुद्ध्वा तुष्टाव तांस्तथा ।
अतिक्रमं हि तं मेने ऋषिर्विपुलमात्मनः ॥७०॥
यत्र दृष्ट्वैव तुष्टाव यत्र के ष्ठेति पृष्टवान् ।
स्तुता स्तुत्या तया प्रीता गच्छन्तः पृश्निमातरः ॥७१॥ १३॥
अवमुच्य स्ववक्षोभ्यो रुक्मं तस्मै तदा ददुः ।
मरुत्सु तु प्रयातेषु श्यावाश्वः सुमहायशाः ॥७२॥
रथवीतेर्दुहितरम् अगच्छन्मनसा तदा ।
स सद्य ऋषिरात्मानं प्रवक्ष्यन् रथवीतये ॥७३॥

एतं मे स्तोममित्याभ्यां दौत्ये रात्रीं न्ययोजयत् ।
रथवीतिमपश्यन्तीं संप्रेक्ष्यार्षेण चक्षुषा ॥७४॥
रम्ये हिमवतः पृष्ठे एष क्षेतीति चाब्रवीत् ।
ऋषेर्नियोगमाज्ञाय देव्या रात्र्या प्रचोदितः ॥७५॥
आदाय कन्यां तां दार्भ्य उपेयायार्चनानसम् ।
पादौ तस्योपसंगृह्य स्थित्वा प्रह्वः कृताञ्जलिः ॥७६॥ १४॥
रथवीतिरहं दार्भ्य इति नाम शशंस च ।
मया संगतिमिच्छन्तं त्वां प्रत्याचक्षि यत्पुरा ॥७७॥
तत्क्षमस्व नमस्तेऽस्तु मा च मे भगवन्क्रुधः ।
ऋषेः पुत्रः स्वयमृषिः पितासि भगवन्नृषेः ॥७८॥
हन्त प्रतिगृहाणेमां स्नुषामित्येवमब्रवीत् ।
पाद्यार्घ्यमधुपर्कैश्च पूजयित्वा स्वयं नृपः ॥७९॥
शुक्लमश्वशतं दत्त्वा अनुजज्ञे गृहान्प्रति ।
शशीयसीं तरन्तं च पुरुमीळ्हं च पार्थिवम् ॥८०॥
षड्भिः सनदिति स्तुत्वा जगामर्षिरपि क्षयम् ।
ऋतेन मैत्रावरुणान्य् एकादश पराणि तु ॥८१॥ १५॥
षळाश्विनानि गर्भार्थे पञ्चर्चोपनिषत्स्तुतिः ।
सप्त कृत्वापराधान्वै विफले दारसंग्रहे ॥८२॥
ऋषिः कृतोऽश्वमेधेन भारतेनेति वै श्रुतिः ।
तमष्टमेऽपराधे तु वृक्षद्रोण्यां स पार्थिवः ॥८३॥
ऋबीसे ह विनिक्षिप्य स्कन्नं रात्रौ न्यधारयत् ।
सोऽश्विनाविति सूक्तेन तुष्टावर्षिः शुभस्पती ॥८४॥
तौ तं तस्मात्समुद्धृत्य चक्रतुः सफलं पुनः ।
नृचः स्वस्यैव गर्भार्थे स्वपतस्तस्य गर्भवत् ॥८५॥
यथा वात इति द्वेये त्वश्विभ्यामितरे ऋचौ ।

B स्रवतामपि गर्भाणां दृष्टं तदनुमन्त्रणम् ॥८६॥ १६॥
B भाववृत्तं तु तद्वत्स्यात् तथारूपं हि दृश्यते ।
B जरायुगर्भशब्दाभ्याम् एतद्रूपं हि दृश्यते ॥८७॥
महे उषस्ये सावित्रे युञ्जतेऽछेति वै स्तुतः ।
पर्जन्यो बळित्ति त्वस्मिन् पृथिवी मध्यमा स्तुता ॥८८॥
B अद्या नो देव सवितर् इयं दुःस्वप्ननाशनी ।
वारुणं तु प्र सम्राजे इन्द्राग्न्यैन्द्राग्नमुत्तरम् ॥८९॥
विष्णुँन्यङ्गं* परं प्रेति मारुतं सूक्तमुत्तमम् ।
B एवयामरुदाख्यातं द्यौर्नैन्द्रे* प्रतिपूर्वकम् ॥९०॥
श्रीसूक्तमाशीर्वादस्तु श्रीपुत्राणां पराणि षट् ।
तत्स्याद्वालक्ष्म्यपनुदम् अग्निस्तत्र निपातभाक् ॥९१॥ १७॥
प्रजावज्जीवपुत्रौ वा गर्भकर्मणि संस्तुतौ ।
नानारूपा पयस्विन्यः संस्रवन्तीति संस्तुताः ॥९२॥
आशीर्वादेषु संज्ञासु कर्मसंस्थासु देवता ।
निपातभाग् लिङ्गवाक्यात् परीक्षेतेह मन्त्रवित् ॥९३॥
मन्त्रप्रयोगमन्त्रयोः प्रयोगो बलवत्तरः ।
विधेस्तयोः परीक्षा स्यान् मन्त्राः स्युरभिधायकाः ॥९४॥
तस्मात्तेन विसंवादो मन्त्राणां तद्गतानि तु ।
गुणाभिधायकानि स्युः संविज्ञानपदानि तु ॥९५॥
मन्त्रेषु गुणभूतेषु प्रधानेषु च कर्मसु ।
प्रधानगुणभूताः स्युर् देवता इति गम्यते ॥९६॥ १८॥
त्रिसांवत्सरिकं सत्त्रं प्रजाकामः प्रजापतिः ।
आहरत्सहितः साध्यैर् विश्वैर्देवैः सहेति च ॥९७॥
तत्र वाग्दीक्षणीयायाम् आजगाम शरीरिणी ।
तां दृष्ट्वा युगपत्तत्र कस्याथ वरुणस्य च ॥९८॥

शुक्रं चस्कन्द तद्वायुर् अग्नौ प्रास्यद्यदृच्छया ।
ततोऽर्चिर्भ्यो भृगुर्जज्ञे अङ्गारेष्वङ्गिरा ऋषिः ॥९९॥
प्रजापतिं* सुतौ दृष्ट्वा दृष्टा वागभ्यभाषत ।
आभ्यामृषिस्तृतीयोऽपि भवेद्त्रैव मे सुतः ॥१००॥
प्रजापतिस्तथेत्युक्तः प्रत्यभाषत भारतीम् ।
ऋषिरत्रिस्ततो जज्ञे सूर्यानलसमद्युतिः ॥१०१॥ १९॥
योऽङ्गारेभ्य ऋषिर्जज्ञे तस्य पुत्रो बृहस्पतिः ।
बृहस्पतेर्भरद्वाजो विदथीति य उच्यते ॥१०२॥
मरुत्स्वासीद्गुरुर्यश्च स एवाङ्गिरसो नपात् ।

RV. vi. सपुत्रस्य तु तस्यैतन् मण्डलं षष्ठमुच्यते ॥१०३॥
त्वं ह्यग्न इति तत्रादाव् आग्नेयानि त्रयोदश ।
सूक्तानि त्रीणि मूर्धानम् अग्नेर्वैश्वानरस्य तु ॥१०४॥
एकान्नत्रिंशदेवात्र पिबेत्यैन्द्राण्यतः परम् ।
अग्ने स क्षेषदित्यस्यां देवौ यौ तु निपातितौ ॥१०५॥
प्रोतये नू म इत्येते वैश्वदेव्यावृचौ स्मृते ।
ऋग्द्वितीया पदं चान्त्यम् ऐन्द्रमेति गवां स्तुतिः ॥१०६॥ २०॥
आससाणास इत्यस्यां वायुरिन्द्रश्च संस्तुतौ ।
B इन्द्रः प्राधान्यतो वात्र स्तुतो वायुर्निपातभाक् ॥१०७॥
B अयं देवस्तृचं सौम्यम् ऐन्द्रमेके प्रचक्षते ।
य आनयदिति त्वस्य तृचोऽधीति बृबुस्तुतिः ॥१०८॥
पितरं स्तौति शंयुश्च तृचस्यान्त्ये पदे स्वकम् ।
स्वादुष्किलायमिति तु सौम्यः पञ्चर्च उत्तरः ॥१०९॥
B इन्द्रः प्रधानतो वात्र स्तुतः सोमो निपातभाक् ।
B इन्द्रस्यैन्द्र्यो*ऽ*नुपानीयाः श्रूयन्ते ह्यैतरेयके ॥११०॥

अगव्यूति स्तौति देवान् पादो भूमिमथोत्तरः ।
बृहस्पतिं तृतीयस्तु इन्द्रमेवोत्तमं पदम् ॥११९॥ २१॥
वनस्पते वीड्वङ्गः परं यत् तदाचार्या भाववृत्तं वदन्ति ।
ऋचस्तु तिस्रस्तु रथाभिमर्शना उपेति तिस्रो दुन्दुभेः संस्तवोऽच ॥११२॥
समश्वपर्णा इति चार्धमैन्द्रं दशादितोऽग्नेस्तृणपाणिकस्य ।
तृचः परो मारुतः पृश्निसूक्ते द्वृचः परो वैश्वदेवः पुनश्च ॥११३॥
आदित्यो वा मारुत एव वा स्याद् आ मा पूषन्निति पौष्णीश्चतस्रः* ।
द्वृचं परं मारुतं तच विद्याद् अन्या द्युभ्वोः कीर्तना पृश्नये वा ॥११४॥ २२॥
स्तुषे सूक्तानि चत्वारि वैश्वदेवान्यतः परम् ।
द्वितीयाग्निं चतुर्थी च वायुं पञ्चम्यथाश्विनौ ॥११५॥
स्तौत्यृक् तु सप्तमी वाचम् अच पूषणमष्टमी ।
त्वष्टारं नवमी रुद्रं भुवनस्येत्यथोत्तरे ॥११६॥
मारुत्यौ यो रजांसीति विष्णुमेव जगावृषिः ।
अभ्यैन्द्रेति* च साविची रौदस्याग्नेय्युताश्विनी* ॥११७॥
अग्नीपर्जन्यावनयोः सौर्यौ* चोदु त्यदित्यृचौ ।
वयं चत्वारि पौष्णानि त्वैन्द्रापौष्णस्य चोत्तरम् ॥११८॥
B रथीतमं कपर्दिनं रौद्रमेके प्रचक्षते ।
ऐन्द्राग्ने प्र नु वोचेति इयं सारस्वतं स्तुषे ॥११९॥ २३॥
आश्विने चौषसे चैव मारुतं तु वपुर्न्विति ।
B उपेति च द्वृचेऽश्विभ्याम् आराधनं* च शंसति ॥१२०॥
मैत्रावरुणमेवैकं विश्वेषां वः सतामिति ।
श्रुष्टीति चैन्द्रावरुणं समैन्द्रावैष्णवं परम् ॥१२१॥
द्यावापृथिव्यौ सविता इन्द्रासोमौ बृहस्पतिः ।
पृथक्पृथक् परैः सूक्तैः सोमारुद्रेति तौ स्तुतौ ॥१२२॥
B चक्रं रथो मणिर्भार्या भूमिरश्वो गजस्तथा ।

B एतानि सप्त रत्नानि सर्वेषां चक्रवर्तिनाम् ॥१२३॥ २४॥
अभ्यावर्ती चायमानः प्रस्तोकश्चैव सार्ञ्जयः ।
आजग्मतुर्भरद्वाजं जितौ वारशिखैर्युधि ॥१२४॥
अभिगम्योचतुस्तौ तं प्रसाद्याख्याय नामनी ।
युधि वारशिखैर्ब्रह्मन् आवां विद्धि विनिर्जितौ ॥१२५॥
भवत्पुरोहितावावां क्षत्रबन्धूञ्जयेवहि ।
क्षत्रं तदपि विज्ञेयं ब्रह्म यत्पाति शाश्वतम् ॥१२६॥
ऋषिस्तौ तु तथेत्युक्त्वा पायुं पुत्रमभाषत ।
अधर्षणीयौ शत्रूणां कुरुष्वैतौ नृपाविति ॥१२७॥
पितरं स तथेत्युक्त्वा युद्धोपकरणं तयोः ।
जीमूतस्येति सूक्तेन पृथक्त्वेनान्वमन्त्रयत् ॥१२८॥ २५॥
प्रथमा त्वस्य सूक्तस्य योद्धारं स्तौति वर्मिणम् ।
धनुषश्च द्वितीया तु तृतीया ज्याभिमन्त्रिणी ॥१२९॥
स्तौत्यृगार्त्नीं चतुर्थी तु इषुधिं स्तौति पञ्चमी ।
अर्धेन सारथिः* षष्ठ्या रश्मयोऽर्धेन संस्तुताः ॥१३०॥
अश्वांस्तु सप्तमी स्तौति आयुधागारमष्टमी ।
नवमी रथगोपांस्तु दशमी रणदेवताः ॥१३१॥
इषुं चैकादशी स्तौति द्वादशी कवचस्तुतिः ।
त्रयोदशी कशां स्तौति हस्तत्राणं चतुर्दशी ॥१३२॥
प्रथमे पञ्चदश्यास्तु पादे दिग्ध इषु स्तुतः ।
अयोमुखी द्वितीये तु अर्धेऽस्त्रं वारुणं परे ॥१३३॥ २६॥
षोळश्यां त्वस्य सूक्तस्य धनुर्मुक्त इषु स्तुतः ।
सप्तदश्यां तु युद्धादेः कवचस्य तु बध्यतः ॥१३४॥
स्तुतिरष्टादशी ज्ञेया युयुत्सो स्तुतिरुत्तमा ।
आशास्ते चोत्तमे पादे ऋषिरात्मन आशिषः ॥१३५॥

सूक्तेनानेन तु स्तुत्वा संयामाक्रान्यृषिस्तयोः ।
ततः प्रस्थापयामास पुनर्वारशिखान्प्रति ॥१३६॥
B एतत्त्यत्ते चतसृभी राज्ञो साहाय्यकाम्यया ।
B भरद्वाजोऽभितुष्टाव प्रीतस्तेन पुरंदरः ॥१३७॥
B अभ्यावर्तिनमभ्येत्य हर्युपीयानदीतटे ।
B सहितश्चायमानेन जघानैनाञ्छचीपतिः ॥१३८॥ २७॥
तौ तु वारशिखाञ्जित्वा ततोऽभ्यावर्तिसार्ञ्जयौ ।
भरद्वाजाय गुरवे ददतुर्विविधं वसु ॥१३९॥
भरद्वाजश्च गर्गश्च दृष्टाविन्द्रेण वै पथि ।
द्वयान् प्रस्तोक इत्याभिर् दानं तद्वै शशंसतुः ॥१४०॥
B ऋषिरप्यभितुष्टाव दानं तच्च च तस्य तु ।
B ऋचैकया द्वयाँ अग्ने दत्तं संकीर्तयन् स्वयम् ॥१४१॥
प्रसङ्गात्त्विह याः सूक्ते देवताः परिकीर्तिताः ।
ता एव सूक्तभाजस्तु मेने राथीतर स्तुतौ ॥१४२॥ २८॥

RV. vii. प्राजापत्यो मरीचिर्हि मारीचः कश्यपो मुनिः ।
तस्य देव्योऽभवञ्जाया दाक्षायण्यस्त्रयोदश ॥१४३॥
B अदितिर्दितिर्दनुः काला दनायुः सिंहिका मुनिः ।
B क्रोधा विश्वा* वरिष्ठा च सुरभिर्विनता तथा ॥१४४॥
B कद्रूश्चैवेति दुहितॄः कश्यपाय ददौ स च ।
तासु देवासुराश्चैव गन्धर्वोरगराक्षसाः ॥१४५॥
वयांसि च पिशाचाश्च जज्ञिरेऽन्याश्च जातयः ।
तत्रैका त्वदितिर्देवी द्वादशाजनयत्सुतान् ॥१४६॥
B भगश्चैवार्यमांशश्च मित्रो वरुण एव च ।
B धाता चैव विधाता च विवस्वांश्च महाद्युतिः ॥१४७॥ २९॥

B त्वष्टा पूषा तथैवेन्द्रो द्वादशो विष्णुरुच्यते ।
इन्द्रं तस्यास्तु तज्जज्ञे मित्रश्च वरुणश्च ह ॥१४८॥
तयोरादित्ययोः सत्त्रे दृष्ट्वाप्सरसमुर्वशीम् ।
रेतश्चस्कन्द तत्कुम्भे न्यपतद्वासतीवरे ॥१४९॥
तेनैव तु मुहूर्तेन वीर्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वसिष्ठश्च तत्रर्षी संबभूवतुः ॥१५०॥
B बहुधा पतिते शुक्रे कलशेऽथ जले स्थले ।
B स्थले वसिष्ठस्तु मुनिः संभूत ऋषिसत्तमः ॥१५१॥
B कुम्भे त्वगस्त्यः संभूतो जले मत्स्यो महाद्युतिः ।
उदियाय ततोऽगस्त्यः शम्यामात्रो महायशाः ॥१५२॥ ३०॥
मानेन संमितो यस्मात् तस्मान्मान्य इहोच्यते ।
यद्वा कुम्भादृषिर्जातः कुम्भेनापि हि मीयते ॥१५३॥
कुम्भ इत्यभिधानं तु परिमाणस्य लक्ष्यते ।
ततोऽप्सु गृह्यमाणासु वसिष्ठः पुष्करे स्थितः ॥१५४॥
सर्वत्र पुष्करं तत्र विश्वे देवा अधारयन् ।
उत्थाय सलिलात्तस्माद् अथ तेपे महत्तपः ॥१५५॥
नामास्य गुणतो जज्ञे वसतेः श्रैष्ठ्यकर्मणः ।
अदृश्यमृषिभिर्हीन्द्रं सोऽपश्यत्तपसा पुरा ॥१५६॥
सोमभागानथो तस्मै प्रोवाच हरिवाहनः ।
B ऋषयो वा इन्द्रमिति ब्राह्मणात्तद्धि दृश्यते ॥१५७॥ ३१॥
वसिष्ठश्च वसिष्ठाश्च ब्राह्मणा ब्रह्मकर्मणि ।
सर्वकर्मसु यज्ञेषु दक्षिणीयतमास्तथा ॥१५८॥
तस्माद्येऽद्यापि वासिष्ठाः सदस्याः स्युस्तु कर्हिचित् ।
अर्हयेद्दक्षिणाभिस्तान् भाल्लवेयी श्रुतिस्त्वियम् ॥१५९॥
ऋषिस्तु मैत्रावरुणिः सूक्तैः षोडशभिः परैः ।

तुष्टावाग्निमिति त्वग्निम् आग्न्यस्तत्र जुषस्व नः ॥१६०॥
प्राग्नयेऽथ प्र सम्राजो द्वितीयं प्राग्नये तृचम् ।
वैश्वानरीयाण्येतानि त्वे हैन्द्राणि पराण्यतः ॥१६१॥
दश पञ्च च सूक्तानि निपातो मरुतां स्तुतिः ।
नकिः सुदास इत्यस्यां दानं पैजवनस्य तु ॥१६२॥ ३२॥
वसिष्ठेन चतुर्भिस्तु द्वे नप्तुरिति कीर्तितम् ।
संवादं सूक्तमैन्द्रं वा श्वित्यञ्चस्तु प्रचक्षते ॥१६३॥
वसिष्ठागस्त्ययोरत्र कीर्त्यते तनयैः सह ।
इन्द्रेण चैव संवादो महिमा जन्म कर्म च ॥१६४॥
पराणि प्रेति चत्वारि वैश्वदेवानि तत्र तु ।
स्तौत्यृगब्जामहिं तत्र मा नोऽहिं बुध्न्यमेव च ॥१६५॥
B अहिराहन्ति मेघान्स एति वा तेषु मध्यमः ।
B योऽहिः स बुध्न्यो बुध्ने हि सोऽन्तरिक्षेऽभिजायते ॥१६६॥
उदु ष्य सवितुः सूक्तं शं नो वाजिनदैवतः ।
तृचोऽर्धर्चश्च भागोऽत्र भगमुग्र इति श्रुतिः ॥१६७॥ ३३॥
पादश्चैव तृतीयोऽत्र पञ्चम्यामहिदैवतः ।
B यथार्धर्चो भगमुग्रस् तथा नूनं भगोऽपि च ॥१६८॥
B स हि रत्नानि सविता सुवातीति भगः स वा ।
वैश्वदेवानि पञ्चोर्ध्वः पञ्चर्चो भगदैवतः ॥१६९॥
प्रातर्जितमुषस्यान्या दृष्टृ*भ्योऽथाशिरेव वा ।
एके तु प्रातरित्यस्यां भगमेव प्रचक्षते ॥१७०॥
आदावन्ते तु ऋषयः कीर्तयन्ति प्रसङ्गतः ।
सूक्तेऽस्मिन्देवतास्त्वन्या अन्यास्तत्र भवन्ति च ॥१७१॥
सालोक्यात्साहचर्याद्वा संस्तवादथवा पुनः ।
गणस्थानाद्भक्तितो वा कीर्त्यन्तेऽन्यास्तु देवताः ॥१७२॥ ३४॥

दाधिक्रमथ सावित्रं रौद्रमित्यनुपूर्वशः ।
दाधिक्रे प्रथमायास्तु देवताः परिकीर्तिताः ॥१७३॥
ता ज्ञेया आप आप्यं स्याद् आर्भवः प्रथमस्तृचः ।
उत्तमा वैश्वदेवी वा आर्भवी वा निगद्यते ॥१७४॥
वैश्वदेवे तथा शस्त्रे आर्भवं शस्यते हि तत् ।
दशमेऽह्नि समस्तं समुद्रज्येष्ठा अपां स्तुतिः ॥१७५॥
समुद्रज्येष्ठा अपां स्तुतिः ॥ ३५॥

॥ इति बृहद्देवतायां पञ्चमोऽध्यायः ॥

आ मामिति तु सूक्तेन प्रत्यृचं देवता स्तुताः ।
B मित्रावरुणावग्निश्च देवा नद्यस्तथैव च ॥१॥
तृचावादित्यदेवत्यौ रोदस्योः प्रेति यस्तृचः ।
वास्तोष्पत्याश्चतस्रस्तु सप्त प्रस्वापिन्यः स्मृताः ॥२॥
परं चत्वारि सूक्तानि मारुतानि क ईमिति ।
तेषां तु पितरं देवं त्र्यम्बकं स्तौत्यृगुत्तमा ॥३॥
स्तुतौ तु मित्रावरुणौ सूक्तैर्यदिति सप्तभिः ।
अश्विनौ तु परैर्देवाव् अष्टभिः प्रति वामिति ॥४॥
यदद्यैकोत्सूर्यस्तिस्र उद्वेतीत्यर्धपञ्चमाः ।
सौर्यस्तच्चक्षुरिति तु गीयते चक्षुर्देवता ॥५॥ १॥
B आदित्यानां तद्वो अद्य द्वे ऋचौ शौनकोऽब्रवीत् ।
B अन्याः सर्वा ऋचः सौर्या यदद्याद्याः प्रकीर्तिताः ॥६॥
B इमे चेतार इत्याद्याः † † † ।
B अर्यम्णो वरुणस्यापि मित्रस्यैता नव स्मृताः ॥७॥
B यदद्य सूर इत्याद्या दशादित्या ऋचः स्मृताः ।
B सविता वादितिर्मित्रो वरुणश्चार्यमा भगः ॥८॥
B स्तुता उदु त्यदित्येतास् तिस्रः सौर्यस्ततः पराः ।
B आशीस्तच्चक्षुरित्येताम् आचार्यः शौनकोऽब्रवीत् ॥९॥
उषास्तु सप्तभिर्व्युषाः सूक्तान्येभ्यः पराणि तु ।
चत्वारीन्द्रावरुणेति इन्द्रावरुणयोः स्तुतिः ॥१०॥ २॥
B उदु ज्योतिरिति त्वस्मिन् अर्धर्चे मध्यम स्तुतः ।
वरुणस्य गृहान्प्राप्तो वसिष्ठः स्वप्न आचरत् ॥११॥

प्राविवेशाथ तं तत्र श्वा नदन्नभ्यधावत ।
B क्रन्दन्तं सारमेयं स धावन्तं दष्टुमुद्यतम् ॥१२॥
B यदर्जुनेति च द्वाभ्यां सान्त्वयित्वा व्यसुष्वपत् ।
स तं प्रस्वापयामास जनमन्यं च वारुणम् ॥१३॥
ततस्तु वरुणो राजा स्वैः पाशैः प्रत्यबध्यत ।
स बद्धः पितरं सूक्तैश् चतुर्भिरिति उत्तरैः ॥१४॥
अभितुष्टाव धीरेति मुमोचैनं ततः पिता ।
A ध्रुवासु त्वेति चोक्तायां पाशा अस्मात्प्रमोचिरे ॥१५॥ ३॥
पराणि त्रीणि सूक्तानि वायव्यानि प्र वीरया ।
अथ तास्त्वैन्द्रवायव्या स्तुतौ यासु द्विवत्स्तुतिः ॥१६॥
B प्र वीरयोक्ता वायव्या प्राउगीत्यैतरेयके ।
B पदस्य व्यत्ययं कृत्वा वायोः प्राधान्यमुच्यते ॥१७॥
B ते सत्येन तृचो यावत् तरस्रतुर्ऋचः पुनः ।
B उशन्तीका प्र सोता चर्ग् द्वयोरेता नव स्मृताः ॥१८॥
ऐन्द्राग्ने शुचिमित्येते प्रेति सारस्वते परे ।
*ऋचा सरस्वान् स इति जनीयन्तश्च तिसृभिः ॥१९॥ ४॥
राजा वर्षसहस्राय दीक्षिष्यन्नाहुषः पुरा ।
चचारैकरथेनेमां ब्रुवन् सर्वाः समुद्रगाः ॥२०॥
यज्ञे वहत भागान्मे इन्वशो वापवैकशः ।
प्रत्यूचुस्तं नृपं नद्यः स्वल्पवीर्याः कथं वयम् ॥२१॥
वहेम भागान्सर्वास्ते सत्त्रे वार्षसहस्रिके ।
सरस्वतीं प्रपद्यस्व सा ते वक्ष्यति नाहुष ॥२२॥
तथेत्युक्त्वा जगामाशु आपगां स सरस्वतीम् ।
सा चैनं प्रतिजग्राह दुदुहे च पयो घृतम् ॥२३॥
एतदत्यद्भुतं कर्म सरस्वत्या नृपं प्रति ।

वारुणिः कीर्तयामास प्रथमस्य द्वितीयया ॥२४॥ ५*॥
यज्ञे बार्हस्पत्यमैन्द्रं वैष्णवे तु परे ततः ।
उरुमैन्द्र्यश्च तिस्रः स्युः पार्जन्ये तिस्र उत्तरे ॥२५॥
A स्तौतीन्द्रं प्रथमा त्वत्र द्वितीयाद्या बृहस्पतिम् ।
B यज्ञ आद्येन्द्रमेवास्तौद् अन्या त्विन्द्राबृहस्पती ॥२६॥
तृतीया नवमी चैव स्तौतीन्द्राब्रह्मणस्पती ।
संवत्सरं तु मण्डूकान् ऐन्द्रासोमं परं तु यत् ॥२७॥
ऋषिर्ददर्श राक्षोघ्नं पुत्रशोकपरिप्लुतः ।
हते पुत्रशते तस्मिन् सौदासैर्दुःखितस्तदा ॥२८॥ ६॥
ये पाकशंसमृक्सौम्या आग्नेयी तत उत्तरा ।
एकादशी वैश्वदेवी सौम्यस्तस्याः परो त्वृचः ॥२९॥
यदि वाहमृगाग्नेयी ऐन्द्री यो मेति तु स्मृता ।
ग्राव्णी प्र या जिगातीति वि तिष्ठध्वं तु मारुती ॥३०॥
प्र वर्तयेति पञ्चैन्द्र्य ऐन्द्रासोमी त्वृगुत्तमा ।
ऋषिस्त्वाशिषमाशास्ते मा नो रक्ष इति त्वृचि ॥३१॥
दिवि चैव पृथिव्यां च तथा पालनमात्मनः ।
उलूकयातुं जह्येतान् नानारूपान्निशाचरान् ॥३२॥
पञ्चदश्यां तु सूक्तस्य अष्टम्यां चैव वारुणिः ।
दुःखशोकपरीतात्मा शपते विलपन्निव ॥३३॥
हते पुत्रशते तस्मिन् वसिष्ठो दुःखितस्तदा ।
रक्षोभूतेन शापात्तु सुदासेनेति वै श्रुतिः ॥३४॥ ७॥

RV. viii. कण्वश्चैव प्रगाथश्च घोरपुत्रौ बभूवतुः ।
गुरुणा तावनुज्ञाताव् ऊषतुः सहितौ वने ॥३५॥
वसतोस्तु तयोस्तत्र कण्वपत्न्याः शिरः स्वपत् ।

कृत्वा कनीयान्कण्वस्य उत्सङ्गे नान्वबुध्यत ॥३६॥
शश्रुकामस्तु तं कण्वः क्रुद्धः पापाभिशङ्कया ।
बोधयामास पादेन दिधक्षन्निव तेजसा ॥३७॥
विदित्वा तस्य तं भावं प्रगाथः प्राञ्जलि स्थितः ।
मातृत्वे च पितृत्वे च वरयामास तावुभौ ॥३८॥
स घौरो वाथ काण्वो वा वंशजैर्बहुभिः सह ।
ददर्शान्यैश्च सहित ऋषिर्मण्डलमष्टमम् ॥३९॥ ८॥
माचिदैन्द्राणि चत्वारि अन्वस्य स्थूरमित्यृचि ।
तुष्टावाङ्गिरसी नारी वसन्ती शश्वती पतिम् ॥४०॥
स्त्रियं सन्तं पुमांसं तम् आसङ्गं* कृतवानृषिः ।
स्वस्य दानं स्तुहीत्यृग्भिश् चतुर्भिः परिकीर्तितम् ॥४१॥
शिक्षेत्यृग्भ्यां तु काश्यस्य विभिन्दोः परिकीर्तितम् ।
पाकस्थाम्नस्तु भोजस्य चतुर्भिर्यमिति स्तुतम् ॥४२॥
पौष्णौ प्रेति प्रगाथौ द्वौ मन्यते शाकटायनः ।
ऐन्द्रमेवाथ पूर्वं तु गालवः पौष्णमुत्तरम् ॥४३॥
ऐन्द्राणामिह सूक्तानाम् उत्तमस्योत्तमे तृचे ।
दानं राज्ञः कुरुङ्गस्य स्थूरं राध इति स्तुतम् ॥४४॥ ९॥
दूरादित्याश्विने सूक्ते सप्तविंशत्तमी यथा ।
इत्यर्धर्चो द्वृचश्चान्यः कशोर्दानस्तुतिः स्मृता ॥४५॥
महानैन्द्रं प्रत्नवत्याम् अग्निं वैश्वानरं स्तुतम् ।
मन्यते शाकपूणिस्तु भार्म्यश्वश्चैव मुद्गलः ॥४६॥
तृचे तु शतमित्यस्मिन् दानं तैरिन्दिरं स्तुतम् ।
परं तु मारुतं प्रेति आ नक्षीण्याश्विनानि च ॥४७॥
त्वमाग्नेयं य इन्द्रेति षळैन्द्राण्युत्तमस्य तु ।
उपोत्तमायामर्धर्चे देवो वास्तोष्पति स्तुतः ॥४८॥

इदमादित्यदेवत्यं तिसृभिस्त्वदिति स्तुता ।
षष्ठ्या चतुर्थ्या सप्तम्या उतेत्याश्विन्यृगष्टमी ॥४९॥ १०॥
स्तुताः शमिति पञ्चस्तु अग्निसूर्यानिलास्त्रयः ।
वरुणार्यममित्राणां प्रगाथो यमिति स्तुतिः ॥५०॥
आग्नेये स्तुती राजर्षेस् त्रसदस्योरदादिति ।
B पञ्चाशतं वधूनां च गवां तिस्रश्च सप्ततीः ॥५१॥
B अश्वोष्ट्राणां तथैवासौ वासांसि विविधानि च ।
B रत्नानि वृषभं श्यावं तासामग्रेसरं पतिम् ॥५२॥
B कृत्वा दारानृषिर्गच्छन् इन्द्रायैतच्छशंस च ।
B वयं सूक्तेन शक्रं च प्रीतस्तेन शचीपतिः ॥५३॥
B ऋषे वरं वृणीष्वेति प्रहृस्तमृषिरब्रवीत् ।
B काकुत्स्थकन्याः पञ्चाशद् युगपद्रमये प्रभो ॥५४॥ ११॥
B कामतो बहुरूपत्वं यौवनं चाक्षयां रतिम् ।
B शङ्खनिधिं पद्मनिधिं मद्गृहेष्वनपायिनम् ॥५५॥
B प्रासादान् विश्वकर्मासौ सौवर्णांस्त्वत्प्रसादतः ।
B कुर्वीत पुष्पवाटीं च पृथक्तासां सुरद्रुमैः ॥५६॥
B मा भूत्सपत्नीस्पर्धासां सर्वमस्त्विति चाब्रवीत् ।
आ गन्त मारुतं सूक्तं वयमित्यैन्द्रमुत्तरम् ॥५७॥
काण्वस्य सोभरेश्चैव यजतो वंशजैः सह ।
कुरुक्षेत्रे यवाञ्जक्षुर् हवींषि विविधानि च ॥५८॥
आश्वः सोऽभितुष्टाव इन्द्रं चित्रं सरस्वतीम् ।
B इन्द्रो वेत्यनयर्चा स दानशक्तिं प्रकाशयन् ॥५९॥ १२॥
B आश्वराजोऽभिमानाच्च प्रहर्षितमनाः स्वयम् ।
संस्तुतो देववच्चित्र ऋषये तु गवां ददौ ॥६०॥
अयुतानां सहस्रं वै निजग्राह स्तुवन्नृषिः ।

ऋषिं चोवाच हृष्टात्मा नाहमर्हाम्यृषे स्तुतिम् ॥ ६१ ॥
तिर्यग्योनौ समुत्पन्नो देवता स्तोतुमर्हसि ।
तमन्यया पुनश्चास्तौद् ओ त्यं सूक्तेन चाश्विनौ ॥ ६२ ॥
ईळिष्वेत्येतदाग्नेयं सखायश्चैन्द्रमुत्तरम् ।
यथा वरो सुषाम्ण इत्य् उत्तमस्त्वौषसस्तृचः ॥ ६३ ॥
अष्टौ तु सहितास्त्वेता देवता विभिदुर्वलम् ।
उषाश्चेन्द्रश्च सोमश्च अग्निः सूर्यो बृहस्पतिः ॥ ६४ ॥
अङ्गिराः सरमा चैव ता वामित्युत्तरस्य तु ।
आदौ मैत्रावरुण्यस्तु नव द्वादश तूत्तराः ॥ ६५ ॥ १३ ॥
वैश्वदेव्यो वरू राजा यस्मादादृषये वसु ।
कीर्तितं तत्तृचे तस्मिन् ऋज्रमुक्षण्यायने ॥ ६६ ॥
B अश्विनौ ददतुः प्रीतौ तदिहोक्तं सुषामणि ।
आश्विनं तु युवोर्युक्ष्व वायव्या उत्तरास्तु याः ॥ ६७ ॥
यं सवर्णा मनुर्नाम लेभे पुत्रं विवस्वतः ।
वैश्वदेवानि पञ्चैतान्य् अग्निरुक्थे जगाद सः ॥ ६८ ॥
बभ्रुरेक इति त्वेता लिङ्गतो द्विपदा दश ।
स्तूयन्ते देवता ह्यासु कर्मभिः स्वैः पृथक्पृथक् ॥ ६९ ॥
स्तुताः कर्मगुणैः स्वैः स्वैर् देवता यत्र तत्र तु ।
पृथक्कर्मस्तुतिर्नाम वैश्वदेवं तदेव तु ॥ ७० ॥ १४ ॥
तासां बभ्रुरिति त्वाद्या सौम्याग्नेयी त्वृगुत्तरा ।
त्वाष्ट्री चैन्द्री च रौद्री च पौष्णी वैष्णव्यृगाश्विनी ॥ ७१ ॥
नवमी मैत्रावरुणी ऋग्दशम्यर्*षिसंस्तवः ।
यजमानप्रसङ्गाच्च य इ*ज्याच्च प्रकीर्तिता ॥ ७२ ॥
B यो यजाति वृचे शक्रो यजतां पतिरीक्षितः ।
B तस्य द्युमान् वृचे यज्वा चतसृष्वपि मह्विति ॥ ७३ ॥

Bयज्वनोरेव दंपत्योः पञ्च या दंपती ऋचः ।
Bआ शर्मोर्शीरितु पौष्ण्यौ* परे मित्रोऽर्यमा यथा ॥७४॥
Bवरुणश्च स्तुतास्त्वत्र आदित्या अग्निमग्नये ।
सूक्तानि प्र कृतानीति त्रीण्यैन्द्राणि पराण्यतः ॥७५॥ १५॥
अध इत्यत्र कन्या तं स्त्रीलिङ्गेनेन्द्रमब्रवीत् ।
स हि तां कामयामास दानवीं पाकशासनः ॥७६॥
ज्येष्ठां स्वसारं व्यंसस्य तस्यैव युवकाम्यया ।
अग्निनेत्याश्विनं सूक्तम् ऐन्द्रसूक्ते परे ततः ॥७७॥
ऐन्द्राग्नं परमाग्नेयम् ऐन्द्राग्नं वारुणे परे ।
उत्तरे वारुणे त्वन्त्य आ वामित्याश्विनस्तृचः ॥७८॥
सूक्ते इमे समाग्नेये ताभ्यामैन्द्रे ततः परे ।
वशायाश्व्याय* यत्प्रादात् कानीतस्तु पृथुश्रवाः ॥७९॥
तदत्र संस्तुतं दानम् आ स इत्येवमादिभिः ।
आ नः प्रगाथौ वायव्यौ सूक्तस्योपोत्तमा च या ॥८०॥ १६॥
Bमित्रार्यमाणौ मरुतः सुनीथो घ तृचे स्तुताः ।
Bद्विचत्वारिंशकात्प्रीतस् त्रिशोकाय पुरंदरः ॥८१॥
Bगिरिं निकृत्य वज्रेण गा ददावसुरैर्हृताः ।
Bयः कृन्तदिति चैतस्याम् ऋषिस्तु स्वयमब्रवीत् ॥८२॥
स्तुता नवम्या त्वदितिर् महीत्यादित्यदैवते ।
अन्त्याः पञ्चोषसेऽपि स्युः सौम्यं स्वादोरिति स्मृतम् ॥८३॥
पराण्यष्टौ तु सूक्तानि ऋषीणां तिग्मतेजसाम् ।
ऐन्द्राण्यत्र तु षड्विंशः प्रगाथो बहुदैवतः ॥८४॥
ऋगन्त्याग्नेरचेत्यग्निः सूर्यमन्यं पदं जगौ ।
प्रस्कण्वश्च पृषध्रस्य* प्रादाद्यद्वसु किंचन ॥८५॥ १७॥
तन्नूरीदिति सूक्ताभ्याम् अखिलं त्विह संस्तुतम् ।

A ऐन्द्राग्न्युभयमित्यत्र षळाग्नेयात्पराणि तु ।
निपातमाह देवानां दाता म इति भागुरिः ॥८६॥
ऋचं यास्कस्तृचं त्वेतं मन्यते वैश्वदेवतम् ।
आदित्यदैवतं सूक्तं त्यान्न्वित्यत्र परं तु यत् ॥८७॥
B धीवराः सहसा मीनान् दृष्ट्वा सारस्वते जले ।
B जालं प्रक्षिप्य तान्बद्ध्वोद् अक्षिपन्सलिलात्स्थलम् ॥८८॥
B शरीरपातभीतास्ते तुष्टुवुश्चादितेः सुतान् ।
B मुमुचुस्तांस्ततस्ते च प्रसन्नास्तान् समूदिरे ॥८९॥
B धीवराः क्षुद्भयं मा वो भूत् स्वर्गं प्राप्स्यथेति च ।
उतेति माता तत्रैषां तृचेनाभिष्टुतादितिः ॥९०॥ १८॥
मातृत्वादभिसंबन्धात् स्तूयेतैषां स्तुतौ स्तुतौ ।
ऐन्द्राग्न्या त्वा रथं त्रीणि स्तौत्यृतूनुप मेति षट् ॥९१॥
ऋक्षाश्वमेधयोरत्र पञ्च दानस्तुतिः पराः ।
अपादिन्द्रस्य चाग्नेश्च विश्वेषां चैव संस्तवः ॥९२॥
तृचस्य प्रथमोऽर्धर्चः शेषो वरुणदैवतः ।
त्वमाग्नेयेऽथवा सूक्तम् उत्तरं हविषां स्तुतिः ॥९३॥
पयःपश्वोषधीनां च तथारूपं हि दृश्यते ।
उदित्याश्विनमाग्नेये परे सूक्ते विशोविशः ॥९४॥
ऋग्भ्यामहमिति द्वाभ्यां स्तौत्यात्मानमृषिः स्वयम् ।
B आत्मानमात्मना स्तुत्वा स्तौति दानं श्रुतर्वणः ॥९५॥ १९॥
B आत्मादानाभिसंबन्धात् परुष्णीं च महानदीम् ।
परया परुष्णीमिन्द्रं त्रिभिः सूक्तैरिमं न्विति ॥९६॥
अयं कृत्नुरिदं सौम्यं त्रीण्यैन्द्राणि पराण्यतः ।
नहीति तेषां प्रथमे वैश्वदेव्यृगवीवृधत् ॥९७॥
देवानामिति देवानां प्रेष्ठमाग्नेयमुत्तरम् ।

त्रीण्याश्विनान्या म इति ऐन्द्राणि तमितीति च ॥९८॥ २०॥
अपालात्रिसुता त्वासीत् कन्या त्वग्दोषिणी पुरा ।
तामिन्द्रश्चकमे दृष्ट्वा विजने पितुराश्रमे ॥९९॥
तपसा बुबुधे सा तु सर्वमिन्द्रचिकीर्षितम् ।
उदकुम्भं समादाय अपामर्थे जगाम सा ॥१००॥
Bदृष्ट्वा सोममपामन्ते तुष्टावर्चा वने तु तम् ।
Bकन्या वारिति चैतस्याम् एषोऽर्थः कथितस्ततः ॥१०१॥
सा सुषाव मुखे सोमं [Bसुत्वेन्द्रं चाजुहाव तम् ।
असौ य एषीत्यनया] पपाविन्द्रश्च तन्मुखात् ॥१०२॥
अपूपांश्चैव सक्तूंश्च भक्षयित्वा स तद्गृहात् ।
ऋग्भिस्तुष्टाव सा चैनं जगादैनं तृचेन तु ॥१०३॥ २१॥
सुलोमामनवद्याङ्गीं कुरु मां शक्र सुत्वचम् ।
Bतस्यास्तद्वचनं श्रुत्वा प्रीतस्तेन पुरंदरः ॥१०४॥
रथछिद्रेण तामिन्द्रः शकटस्य युगस्य च ।
प्रक्षिप्य निश्चकर्ष त्रिः सुत्वक् सा तु ततोऽभवत् ॥१०५॥
तस्यास्त्वगपहता या पूर्वा सा शल्यकोऽभवत् ।
उत्तरा त्वभवद्गोधा कृकलासस्त्वगुत्तमा ॥१०६॥
इतिहासमिदं सूक्तम् आहतुर्यास्कभागुरी ।
कन्येति शौनकस्त्वैन्द्रं पान्तमित्युत्तरे च ये ॥१०७॥
Bउत्तमा त्वार्भवी प्रोक्ता उत्तरस्यैतरेयके ।
Bछान्दोमिके तृतीये तद् आर्भवं शस्यते यतः ॥१०८॥ २२॥
मारुतं गौः परं सूक्तम् आ त्वैन्द्राणि पराणि षट् ।
Bसूक्ते द्वितीय एतेषाम् इतिहासं प्रचक्षते ।
अपक्रम्य तु देवेभ्यः सोमो वृत्रभयार्दितः ॥१०९॥
नदीमंशुमतीं नाम्ना अभ्यतिष्ठत्कुरून्प्रति ।

तं बृहस्पतिनैकेन अभ्ययाद्वृत्रहा सह ॥११०॥
योत्स्यमानः सुसंहृष्टैर् मरुद्भिर्विविधायुधैः ।
दृष्ट्वा तानायतः सोमः स्वबलेन व्यवस्थितः ॥१११॥
मन्वानो वृत्रमायान्तं जिघांसुमरिसेनया ।
व्यवस्थितं धनुष्मन्तं तमुवाच बृहस्पतिः ॥११२॥
मरुत्पतिरयं सोम एहि देवान्पुनर्विभो ।
B श्रुत्वा देवगुरोर्वाक्यम् अनर्थं वृत्रशङ्कया ॥११३॥ २३॥
सोऽब्रवीन्नेति तं शक्रः स्वर्ग एव बलाद्बली ।
इयाय देवानादाय तं पपुर्विधिवत्सुराः ॥११४॥
जघ्नुः पीत्वा च दैत्यानां समरे नवतीर्नव ।१ ⁄
तदेतदप्यवेत्यस्मिंस् तृचे सर्वं निगद्यते ॥११५॥
B इन्द्रं च मरुतश्चैव तथैव च बृहस्पतिम् ।
तृचस्य देवता ह्येता इन्द्रमेवाह शौनकः ॥११६॥
B ऐन्द्राबार्हस्पत्य उक्तो ब्राह्मणे त्वैतरेयके ।
तृचेनेन्द्रमपश्यंस्तं नेमोऽयमिति भार्गवः ॥११७॥
तुष्टावेन्द्रो बृचेनायम् अहं पश्य च मामृषे ।
B स हि स्तुवन्नेमं एको नेन्द्रो अस्तीति चाब्रवीत् ॥११८॥ २४॥
B तदाकर्ण्येन्द्र आत्मानम् ऋग्भ्यां तुष्टाव दर्शयन् ।
ऋषिस्तं दृष्ट्वा सुप्रीतो विश्वेत्ता त इति त्र्यृचे ॥११९॥
विविधानि च कर्माणि दानमैन्द्रं च शंसति ।
मनोजवास्तु सौपर्णी समुद्रे वज्रसंस्तवः ॥१२०॥
वाचं सर्वगतां देवीं स्तौति यद्वागिति त्र्यृचे ।
त्रींल्लोकानभितप्येमान् वृत्रस्तस्थौ स्वया त्विषा ॥१२१॥
तं नाशकद्धन्तुमिन्द्रो विष्णुमभ्येत्य सोऽब्रवीत् ।
वृत्रं हनिष्ये तिष्ठस्व विक्रम्याद्य ममान्तिके ॥१२२॥

उद्यतस्यैव वज्रस्य द्यौर्ददातु ममान्तरम् ।
तथेति विष्णुस्तच्चक्रे द्यौश्चास्य विवरं ददौ ॥१२३॥ २५॥
तदेतदखिलं प्रोक्तं सखे विष्णविति त्वृचि ।
मैत्रावरुण्यः सूक्ताद्यास् चतस्रस्त्वृधगित्यृचः ॥१२४॥
प्रेति मित्राय पादाश्च अर्यम्णो वरुणस्य च ।
त्रयश्चतुर्थः सर्वेषाम् आदित्यानामिति स्तुतिः ॥१२५॥
परा त्वादित्यदेवत्या आ म इत्याश्विनो त्वृचः ।
वायव्ये सौर्ये उषस्या प्रभां वा चन्द्रसूर्ययोः ॥१२६॥
पावमानी प्रजा हेति मातेत्यृग्भ्यां तु गौ स्तुता ।
त्वमग्ने बृहदाग्नेये परेऽग्निस्त्वृचि संस्तुतः ॥१२७॥
मरुद्भिः सह रुद्रैश्च आग्ने याहीति मध्यमः ।
B प्रजा हेत्यपि वार्धर्चे प्रथमेऽग्निरिहोच्यते ॥१२८॥
B पादे तृतीय आदित्यस् तुरीये मध्यम स्तुतः ।
B रहस्ये ब्राह्मणेऽप्येवं व्याख्यातं हैतरेयके ॥१२९॥ २६॥

RV. ix. पवमान स्तुतः सोमो नवमे त्विह मण्डले ।
पवमानवदाप्र्यस्तु समिद्ध इति संस्तुताः ॥१३०॥
अग्न आयूंषीति चासु तिसृष्वग्निर्निपातभाक् ।
अविता न इति तस्मिंस् तृचे पूष्णा सह स्तुतः ॥१३१॥
आग्नेय्यौ द्वे ऋचावग्न यत्त इत्युत्तरे ततः ।
उभाभ्यामिति सावित्री आग्निसावित्र्यृगुत्तरा ॥१३२॥
पुनन्तु मां वैश्वदेवी आग्नेयी त्वृगुप प्रियम् ।
उत्तरे च य इत्येते स्वाध्यायाध्येतृसंस्तवः ॥१३३॥
सूक्ते निरुक्ते सक्केऽग्नी रक्षोहा घर्मसंस्तवः ।
सूर्यवच्चात्मवच्चापि पवित्रमिति चोच्यते ॥१३४॥ २७॥

B आर्भवस्तु भवेत्पाद ऋभुधीर इति स्मृतः ।
B निपातैस्तु त्रिभिः पादैस् त्रयो देवा इहोदिताः ॥१३५॥
ब्रह्मा देवानां तिस्रोक्तास् त्रिभिस्त्वेतैस्तृचैस्तृचैः ।
सूर्यवच्चात्मवच्चापि स्तूयते सोम एव वा ॥१३६॥
अनावृष्ट्यां तु वर्तन्त्यां पप्रच्छर्षीञ्छचीपतिः ।
काले दुर्गे महत्यस्मिन् कर्मणा केन जीवथ ॥१३७॥
B शकटं शाकिनी गावः कृषिरस्यन्दनं वनम् ।
B समुद्रः पर्वतो राजा एवं जीवामहे वयम् ॥१३८॥
स्तुवन्नेव शशंसास्य ऋषिराङ्गिरसः शिशुः ।
नानानीयेन सूक्तेन ऋषीणामेव संनिधौ ॥१३९॥ २८॥
तानिन्द्रस्त्वाह सर्वांस्तु तपध्वं सुमहत्तपः ।
न ह्यृते तपसः शक्यम् इदं कृच्छ्रं व्यपोहितुम् ॥१४०॥
अथ ते वै तपस्तेपुः सर्वे स्वर्गजिगीषवः ।
ततस्ते तपसोग्र्येण पावमानीर्ऋचोऽब्रुवन् ॥१४१॥
अनसूयुरधीयानः शुश्रूषुस्तपसान्वितः ।
दश पूर्वापरान् वंश्यान् पुनात्यात्मानमेव च ॥१४२॥
पापं यच्चाकरोत्किंचिम् मनोवाग्देहभोजनैः ।
पूतः स तस्मात्सर्वस्मात् स्वाध्यायफलमश्नुते ॥१४३॥
A पावमान्यः परं ब्रह्म शुक्रं ज्योतिः सनातनम् ।
A गायत्र्योऽन्तेऽत्र यश्चासां प्राणानायम्य तन्मनाः ॥१४४॥
पावमानं पितॄन्देवान् ध्यायेद्यश्च सरस्वतीम् ।
पितॄंस्तस्योपवर्तेत क्षीरं सर्पिर्मधूदकम् ॥१४५॥
B एतत्सूक्त*शतं सौम्यं मण्डलं सचतुर्दशम् ।
B पावमानमिति ख्यातम् अनुवाकास्तु सप्त वै ॥१४६॥ २९॥

RV. x. सप्ताग्नेयानि सूक्तानि ददर्शाग्य इति त्रितः ।
प्र केतुनेति त्वाष्ट्रस्तु त्रिशिराः सूक्तमुत्तरम् ॥१४७॥
ऋचस्त्वस्य षळाग्नेय्यस् तृचस्त्वस्येति यः परः ।
तेनेन्द्रमभितुष्टाव स्वप्नान्त इति नः श्रुतिः ॥१४८॥
अभवत्स हि देवानां पुरोधाः प्रियकाम्यया ।
असुराणां स्वसुः पुत्रस् त्रिशिरा विश्वरूपधृक् ॥१४९॥
तमृषिं प्रहितं त्विन्द्रो देवेषु बुबुधेऽसुरैः ।
सोऽस्य वज्रेण तान्याशु शिरांसि त्रीण्यथाछिदत् ॥१५०॥
तस्य यत्सोमपानं तु मुखं सोऽभूत्कपिञ्जलः ।
कलविङ्कः सुरापाणम् अन्नादं तित्तिरिस्त्वभूत् ॥१५१॥ ३०॥
तं वागभ्यवदद्ब्राह्मी ब्रह्महासि शतक्रतो ।
प्रपन्नं हतवान्यस्माद् विश्वरूपं पराङ्मुखम् ॥१५२॥
तमभ्यसिञ्चत्सूक्तेन ऋषिराप इति स्वयम् ।
सिन्धुद्वीपोऽपनुत्त्यर्थं तस्याश्लीलस्य पाप्मनः ॥१५३॥
मैथुनार्थमभीप्सन्तीं प्रत्याचष्टे यमीं यमः ।
तदो चिदिति संवादो विवस्वत्सुतयोस्तयोः ॥१५४॥
वृषाग्नेये हविर्धाने युजे वामत्र संस्तुते ।
परेयिवांसमित्यत्र स्तूयते मध्यमो यमः ॥१५५॥
अथर्वाणोऽथ भृगवोऽङ्गिरसः पितरः सह ।
षष्ठ्यां देवगणास्तत्र संस्तूयन्ते द्युभक्तयः ॥१५६॥ ३१॥
B पितृभिश्चाङ्गिरोभिश्च संस्तुतो दृश्यते यमः ।
B मन्त्रेषु बहुशः पादे विवस्वन्तं पिता हि सः ॥१५७॥
B संस्कार्यप्रेतसंयुक्तैः पितृभि स्तूयते यमः ।
B प्रेहि प्रेहीति तिसृषु प्रेताशिष उदाहृताः ॥१५८॥
B पितृणां हि पतिर्देवो यमस्तस्मात्स सूक्तभाक् ।

अति द्रव तृचे ऽग्नानौ परं पित्र्यमुदीरताम् ॥१५९॥

A उत्तरेण तु सूक्तेन श्मशाने कर्म शंसति ।
पितृदेवासुराणां च अभवन्नग्नयस्त्रयः ।
हव्यकव्यवहौ चोभौ सहरक्षाश्च नाम यः ॥१६०॥
तत्र मैनमिति त्वेतत् कव्यवाहनसंस्तुतिः ।
इतराणि तु दैवस्य स्तुतिर्नास्यासुरस्य च ॥१६१॥ ३२॥
अभवन्मिथुनं त्वष्टुः सरण्यूस्त्रिशिराः सह ।
स वै सरण्यूं प्रायच्छत् स्वयमेव विवस्वते ॥१६२॥
ततः सरण्य्वां जज्ञाते यमयम्यौ विवस्वतः ।
तौ चाप्युभौ यमावेव ज्यायांस्ताभ्यां तु वै यमः ॥१६३॥ ३३॥
ज्यायांस्ताभ्यां तु वै यमः ॥

॥ इति बृहद्देवतायां षष्ठोऽध्यायः ॥

सृष्ट्वा भर्तुः परोक्षं तु सरण्यूः सदृशीं स्त्रियम् ।
निक्षिप्य मिथुनं तस्याम् अश्वा भूत्वापचक्रमे ॥१॥
अविज्ञानाद्विवस्वांस्तु तस्यामजनयन्मनुम् ।
राजर्षिरभवत्सोऽपि विवस्वानिव तेजसा ॥२॥
स विज्ञाय त्वपक्रान्तां सरण्यूमश्वरूपिणीम् ।
त्वाष्ट्रीं प्रति जगामाशु वाजी भूत्वा सलक्षणः ॥३॥
सरण्यूश्च विवस्वन्तं विदित्वा हयरूपिणम् ।
मैथुनायोपचक्राम तां च तत्रारुरोह सः ॥४॥
ततस्तयोस्तु वेगेन शुक्रं तदपतद्भुवि ।
उपाजिघ्रच्च सा त्वश्वा तच्छुक्रं गर्भकाम्यया ॥५॥ १॥
आघ्रातमात्राच्छुक्रात्तु कुमारौ संबभूवतुः ।
नासत्यश्चैव दस्रश्च यौ स्तुतावश्विनाविति ॥६॥
इतिहासमिमं यास्कः सरण्यूदेवते तृचे ।
विवस्वतश्च त्वष्टुश्च त्वष्टेति सह मन्यते ॥७॥
पूषेति पादौ पौष्णौ द्वाव् आग्नेयावुत्तरौ तु यौ ।
स्यात्तृतीयोऽपि वा पौष्णस् तिस्रश्चान्याः परास्तु याः ॥८॥
अपां स्तुतिस्त्वृगन्यैका तृचात्सारस्वतात्परा ।
स्तुतः परोक्षः सोमस्तु द्रप्स इत्युत्तरे तृचे ॥९॥
अब्देवताशीर्वादो वा पयस्वत्युत्तरा तु या ।
चतस्रस्ता स्तुतिर्मृत्योर् अन्त्ये कृप्ताश्च कर्मणि ॥१०॥ २॥
B मृतशिष्टेभ्य आशास्ते इमे ज्योग्जीवनं पुनः ।
B इमं जीवेभ्य आशास्ते तेभ्यः परिधिकर्मणि ॥११॥

यथा धाय्युत्तरा त्वाष्ट्री ततो याम्या इमास्त्विति ।
स्त्रीणामाशिषमाशास्ते तयैवाञ्जनकर्मणि ॥१२॥
उदीर्ष्व नारीत्यनया मृतं पत्न्यनुरोहति ।
भ्राता कनीयान्प्रेतस्य निगद्य प्रतिषेधति ॥१३॥
B कुर्यादेतत्कर्म होता देवरो न भवेद्यदि ।
B प्रेतानुगमनं न स्याद् इति ब्राह्मणशासनात् ॥१४॥
B वर्णानामितरेषां च स्त्रीधर्मोऽयं भवेन्न वा ।
शान्त्यर्थं धनुरादाने प्रेतस्यर्चं धनुर्जपेत् ।
यस्मादेताः प्रयुज्यन्ते श्मशाने चान्यकर्मणि ॥१५॥ ३॥
तस्माद्वदेदृचस्यास्य देवतां मृत्युमेव तु ।
मन्त्रेषु ह्यनिरुक्तेषु देवतां कर्मतो वदेत् ॥१६॥
मन्त्रतः कर्मतश्चैव प्रजापतिरसंभवे ।
पराश्चतस्रो यास्त्वत्र उप सर्पेति पार्थिवी ॥१७॥
तासां प्रयोगः प्रेतस्य अस्थिसंचयकर्मणि ।
प्रतीचीने यथाहानि अपहृत्येतराणि तु ॥१८॥
अहःसु पितरो दधुर् इत्याशास्तेऽन्ययाशिषः ।
B अहःस्वागामिषु च मां प्रय*न्तं समजीवयन् ॥१९॥
नि वर्तध्वमितीदं तु गवां केचिदपां विदुः ।
अर्धर्चः प्रथमायास्तु अग्नीषोमीय उत्तरः ॥२०॥ ४॥
ऐन्द्री षष्ठी द्वितीयायाम् उभौ देवौ निपातितौ ।
दशाक्षरं तु शान्त्यर्थं मानसं सूक्तमुच्यते ॥२१॥
त्रीण्यैन्द्राणि कुहेत्यत्र आग्नेयाभ्यां पराणि तु ।
तृचोऽत्रास्त्याश्विनस्त्वेक ऐन्द्राणामुत्तमे युवम् ॥२२॥
भद्रं सौम्यं प्र हि पौष्णं त्रीण्यैन्द्राणि पराण्यसत् ।
तेषामाद्येन मत्तः सन् स्वानि कर्माणि शंसति ॥२३॥

यथा चरति भूतेषु यथा वर्षति पाति च ।
सूक्ते तदस्मिन्नष्टाभिर् ऋग्भिरुक्तमभूर्विति ॥२४॥
सप्तेति मरुत स्तौति स्तौति वज्रमृगुत्तरा ।
अग्निमिन्द्रं च सोमं च पीवानं मेषमर्चति ॥२५॥ ५॥
पूर्वोऽर्धर्चोऽपरस्तस्याः पर्जन्यं वायुना सह ।
वि क्रोशनास इत्यग्निम् उत्तरा सूर्यमेव तु ॥२६॥
एतौ मेऽयं य इत्येते स्तुतिश्चैवेन्द्रवज्रयोः ।
वृक्षेवृक्षे धनुश्चैन्द्रं देवानामिति तु त्रयः ॥२७॥
शीतोष्णवर्षदातारः पर्जन्यानिलभास्कराः ।
अन्ये सूर्यानिलौ चोभौ स्तूयेते च पदे सह ॥२८॥
सा ते जीवातुरित्यस्याम् इन्द्रो वा सूर्य एव वा ।
विश्वो ह्यन्यस्तु संवाद ऋषेः शक्रस्य चैव हि ॥२९॥
युग्माः शक्रस्य विज्ञेया वसुक्रस्येतरा ऋचः ।
B स्नुषेन्द्रस्यागतान्देवान् दृष्ट्वा शक्रमनागतम् ॥३०॥ ६॥
B यज्ञं परोक्षवत्प्राह श्वशुरो नागतो मम ।
B यद्यागच्छेद् भक्षयेत्स धानाः सोमं पिबेदपि ॥३१॥
B इति तस्या वचः श्रुत्वा तत्क्षणादेत्य वज्रधृक् ।
B तिष्ठन्वेद्यामुत्तरस्याम् उच्चैराह स रोरुवत् ॥३२॥
तृतीयया चतुर्थ्या च प्र देवत्रेत्यपां स्तुतौ ।
अपांनपादित्यनेन नाम्नाग्निर्मध्यम स्तुतः ॥३३॥
एति यद्वैश्वदेवं तु तस्य प्रेत्यैन्द्रमुत्तरम् ।
वैश्वदेवी प्र मेत्येका सं मेत्यैन्द्रो द्वृचः परः ॥३४॥
कुरुश्रवणमर्चतः परे द्वे त्रासदस्यवम् ।
मृते मित्रातिथौ राज्ञि तन्नपातमृषिः परैः ॥३५॥ ७॥
उपमश्रवसं यस्य चतुर्भिः स व्यशोकयत् ।

प्रावेपा इति सूक्तं यत् तदक्षस्तुतिरुच्यते ॥३६॥
अत्राक्षान्द्वादशी स्तौति नवम्याद्या च सप्तमी ।
A त्रयोदशी कृषिं स्तौति कितवं चानुशास्ति ।
अक्षांस्तु शेषा निन्दन्ति अबुध्रं वैश्वदेवते ॥३७॥
B सावित्रमेके मन्यन्ते महो अग्ने स्तवं परम् ।
B आचार्याः शौनको यास्को गालवश्चोत्तमामृचम् ॥३८॥
नमः सौर्यमैन्द्रमस्मिन् सौर्ये षष्ठ्या तु या स्तुताः ।
निपातिन्य*स्ताः सूक्तान्ते वैश्वदेवोऽत्र तु द्वृचः ॥३९॥
आश्विनानि तु यस्त्रीणि ऐन्द्राण्यस्तेव सु प्र च ।
ऐन्द्राण्युत्तमायास्तु स्तुतोऽर्धर्चे बृहस्पतिः ॥४०॥ ८॥
परे दिवस्पर्याग्नेये प्रथमस्योत्तमेन तु ।
द्यावापृथिव्यौ विश्वे च पञ्चोऽर्धर्चेन संस्तुताः ॥४१॥
B आसीत्काक्षीवती घोषा पापरोगेण दुर्भगा ।
B उवास षष्टिं वर्षाणि पितुरेव गृहे पुरा ॥४२॥
B आतस्थे महतीं चिन्तां न पुत्रो न पतिर्मम ।
B जरां प्राप्ता मुधा तस्मात् प्रपद्येऽहं शुभस्पती ॥४३॥
B यथैतौ मामकस्तात आराध्यावाप यौवनम् ।
B आयुरारोग्यमैश्वर्यं सर्वभूतहने विषम् ॥४४॥
B रूपवत्तां च सौभाग्यम् अहं तस्य सुता यदि ।
B ममापि मन्त्राः प्रादुःस्युर् यै स्तोष्येते मयाश्विनौ ॥४५॥ ९॥
B चिन्तयन्तीति सूक्ते द्वे यो वां परि ददर्श सा ।
B स्तुतौ तावश्विनौ देवौ प्रीतौ तस्या भगान्तरम् ॥४६॥
B प्रविश्य विजरारोगां सुभगां चक्रतुश्च तौ ।
B भर्तारं ददतुस्तस्यै सुहस्त्यं च सुतं मुनिम् ॥४७॥
B ददतुस्तत्सुपर्णाभ्यां यत्रासत्येति कीर्त्यते ।

B काक्षीवत्यै च घोषायै न तस्यामाजु*रोऽनया ॥४८॥
प्राजापत्यासुरी त्वासीद् विकुण्ठा नाम नामतः ।
सेच्छन्तीन्द्रसमं पुत्रं तेपेऽथ सुमहत्तपः ॥४९॥ १०॥
सा प्रजापतितः कामांल् लेभेऽथ विविधान् वरान् ।
तस्यां चेन्द्रः स्वयं जज्ञे जिघांसुर्दैत्यदानवान् ॥५०॥
एकदा दानवैः सार्धं समरे समसज्यत ।
जघान तेषां नवतीर् नव सप्त च सप्तकान् ॥५१॥
भित्त्वा स्वबाहुवीर्येण हैमरौप्यायसीः पुरीः ।
हत्वा सर्वान् यथास्थानं पृथिव्यादिष्ववस्थितान् ॥५२॥
पृथिव्यां कालकेयांश्च पौलोमांश्चैव धन्विनः ।
तांश्च व्युत्सादयामास प्रह्लादतनयान्दिवि ॥५३॥ ११॥
राज्यं प्राप्य स दैत्येषु स्वेन वीर्येण दर्पितः ।
देवान्बाधितुमारेभे मोहितोऽसुरमायया ॥५४॥
बाध्यमानास्तु तेनापि असुरेणामितौजसा ।
उपाधावन्नृषिश्रेष्ठं तत्प्रबोधाय सप्तगुम् ॥५५॥
ऋषिस्तु सप्तगुर्नाम तस्यासीत्सुप्रियः सखा ।
स चैनमभितुष्टाव जगृभ्मेति करे स्पृशन् ॥५६॥
ततः स बुद्ध्वा चात्मानं सप्तगुस्तुतिहर्षितः ।
आत्मानमेव तुष्टाव अहं भुवमिति त्रिभिः ॥५७॥
कीर्तयन्स्वानि कर्माणि यानि स्म कृतवान्पुरा ।
यथाकरोच्च वैदेहं व्यंसं सोमपतिं नृपम् ॥५८॥ १२॥
वसिष्ठशापादभवद् वैदेहो नृपतिः पुरा ।
इन्द्रप्रसादादीजे च सत्त्रैः सारस्वतादिभिः ॥५९॥
B प्रभूतां शक्तिमत्तां च शत्रूणामप्यपाक्रियाम् ।
नृषु सर्वेषु चैश्वर्यं प्रभुत्वं भुवनेषु च ।

प्र वो मह इति त्वस्याम् आत्मनो वीर्यमक्षयम् ॥६०॥
वैश्वानरे गृहपतौ यविष्ठेऽग्नौ च पावके ।
वषट्कारेण वृक्णेषु भ्रातृ*ष्वग्नौ सहःसुते ॥६१॥
अपचक्राम देवेभ्यः सौचीकोऽग्निरिति श्रुतिः ।
स प्राविशदपक्रम्य ऋतूनपो वनस्पतीन् ॥६२॥
ततोऽसुराः प्रादुरासन् नष्टेऽग्नौ हव्यवाहने ।
तेऽग्निमेवान्वैच्छन्त देवा हत्वासुरान्युधि ॥६३॥ १३॥
तं तु दूराद्यमश्चैव वरुणश्चान्वपश्यताम् ।
उभावेनं समादाय देवानेवाभिजग्मतुः ॥६४॥
दृष्ट्वा देवास्त्वेनमूचुर् अग्ने हव्यानि नो वह ।
वरान् गृहाण चास्मत्तश् चित्रभानो भजस्व नः ।
Bदेवयानान् सुगान् पथः कुरुष्व सुमनाः स्वयम् ॥६५॥
प्रत्युवाचाथ तानग्निर् विश्वे देवा यदूच माम् ।
तत्करिष्ये जुषन्तां तु होत्रं पञ्च जना मम ॥६६॥
शालामुख्यः प्रणीतश्च पुत्रो गृहपतेश्च यः ।
उत्तरो दक्षिणश्चाग्निर् एते पञ्च जनाः स्मृताः ॥६७॥ १४॥
मनुष्याः पितरो देवा गन्धर्वोरगराक्षसाः ।
Bगन्धर्वाः पितरो देवा असुरा यक्षराक्षसाः ॥६८॥
यास्कौपमन्यवावेतान् आहतुः पञ्च वै जनान् ।
निषादपञ्चमान् वर्णान् मन्यते शाकटायनः ॥६९॥
ऋत्विजो यजमानं च शाकपूणिस्तु मन्यते ।
Bहोताध्वर्युस्तथोद्गाता ब्रह्मा चेति वदन्ति तान् ॥७०॥
Bचक्षुः श्रोत्रं मनो वाक् च प्राणश्चेत्यात्मवादिनः ।
Bगन्धर्वाप्सरसो देवा मनुष्याः पितरस्तथा ॥७१॥
Bसर्पाश्च ब्राह्मणे चैव श्रूयन्ते ह्यैतरेयके ।

B ये चान्ये पृथिवीजाता देवाश्चान्येऽथ यज्ञियाः ॥७२॥ १५॥
आयुरस्तु च मे दीर्घं हवींषि विविधानि च।
अरिष्टिः पूर्वजानां च भ्रातॄणामध्वरेऽध्वरे ॥७३॥
प्रयाजाश्चानुयाजाश्च घृतं सोमे च यः पशुः।
मद्दैवत्यानि वै सन्तु यज्ञो मद्दैवतोऽस्तु च ॥७४॥
तवाग्ने यज्ञ इत्येतत् प्रत्यार्धि स्विष्टकृच्च सः।
यस्य त्रीणि सहस्राणि नव त्रीणि शतानि च ॥७५॥
त्रिंशच्चैव तु देवानां सर्वानेव वरान्ददुः।
ततोऽग्निः सुमनाः प्रीतो विश्वैर्देवैः पुरस्कृतः ॥७६॥
विधूयाङ्गानि यज्ञेषु चक्रे होत्रमतन्द्रितः।
भ्रातृभिः सहितः प्रीतो दिव्यात्मा हव्यवाहनः ॥७७॥ १६॥
तस्यास्थि देवदार्वासीन् मेदो मांसं च गुग्गुलुः।
सुगन्धितेजनं स्नायु शुक्रं रजतकाञ्चने ॥७८॥
रोमाणि काशाः केशास्तु कुशाः कूर्मा नखानि च।
अन्त्राणि चैवाप्यवका मज्जा सिकतशर्कराः ॥७९॥
असृक् पित्तं च विविधा धातवो गैरिकादयः।
एवमग्निश्च देवाश्च सूक्तैर्महदिति त्रिभिः ॥८०॥
समूदिरे परे त्वस्माद् ऐन्द्रे सूक्ते तु तां सु ते।
B विधुं दद्राणमित्यस्यां सूर्याचन्द्रमसौ स्तुतौ ॥८१॥
B प्राणवच्चात्मवच्चापि स्तुतिरप्यत्र दृश्यते।
इदं द्वे वैश्वदेवे च द्वितीये *मनसस्तृचः ॥८२॥ १७*॥
प्रथमैन्द्री द्वितीयाग्नेय्य् अन्त्या तत्सोमदेवता।
B अपि स्तौति पितॄनेतद् आर्त्विजं यत्तदुत्तरम् ॥८३॥
B सूक्तमाख्यानसंयुक्तं वक्तुकामस्य मे शृणु।
B संमोहान्नष्टसंज्ञस्य शत्रुणाभिहतस्य तु ॥८४॥

जीवावृत्तिः सुबन्धोर्वा यदि वा मनस स्तवः ।
राजासमातिरैक्ष्वाकू रथप्रोष्ठः पुरोहितान् ॥८५॥
व्युदस्य बन्धुप्रभृतीन् द्वैपदा ये ऽत्रिमण्डले ।
द्वौ किराताकुली नाम ततो मायाविनौ द्विजौ ॥८६॥
असमातिः पुरोऽधत्त वरिष्ठौ तौ हि मन्यते ।
तौ कपोतौ द्विजौ भूत्वा गत्वा गौपायनानभि ॥८७॥ *१८॥
मायाबलाच्च योगाच्च सुबन्धुमभिपेततुः ।
स दुःखादभिघाताच्च मुमोह च पपात च ॥८८॥
तौ ततोऽस्यासुमालुच्य राजानमभिजग्मतुः ।
ततः सुबन्धौ पतिते गतासौ भ्रातरस्त्रयः ॥८९॥
जेपुः स्वस्त्ययनं सर्वे मेति गौपायनाः सह ।
मनश्चावर्तनं तस्य सूक्तं यदिति तेऽभ्ययुः ॥९०॥
A जेपुश्च भेषजार्थं यं प्र तारीति परं ततः ।
सूक्तस्याद्यस्तृचस्तत्र निर्ऋतेरपनोदनः ॥९१॥
त्रयः पादा मो ष्विति तु सौम्या नैर्ऋत उत्तमः ।
ऋक् सौम्या नैर्ऋती चैषा असुनीते स्तुतिः परे ॥९२॥
द्वृचे त्वानुमतं पादम् अन्त्यं यास्कस्तु मन्यते । १९॥
भूर्द्यौः सोमश्च पूषा च खं पथ्या स्वस्तिरेव च ॥९३॥
सुबन्धोरेव शान्त्यर्थं पुनर्न ऋचि तु स्मृताः ।
तृचः शमिति रोदस्योर् ऐन्द्रोऽर्धर्चः समित्यृचि ॥९४॥
रपसो नाशनार्थं वै तुष्टुवुस्त्वथ रोदसी ।
रप इत्यभिधानं तु गदितं पापकृच्छ्रयोः ॥९५॥
ऋग्भिरेति चतसृभिस् तत ऐक्ष्वाकुमस्तुवन् ।
इन्द्र क्षत्रेत्यृचा चास्य स्तुत्वाशंसिषुराशिषः ॥९६॥
अगस्त्यस्येति माता च तेषां तुष्टाव तं नृपम् ।

स्तुतः स राजा सव्रीळस् तस्थौ गौपायनानभि ॥९७॥
सूक्तेनाप्यस्तुवन्नग्निं द्वैपदेन यथात्रिषु ।
अग्निरप्यब्रवीदेतान् अयमन्तःपरि*ध्यसुः ॥९८॥ २०॥
सुबन्धोरस्य चैक्ष्वाकोर् मया गुप्तो हितार्थिना ।
सुबन्धवे प्रदायासुं जीवेत्युक्त्वा च पावकः ॥९९॥
स्तुतो गौपायनैः प्रीतो जगाम त्रिदिवं प्रति ।
अयं मातेति हृष्टास्ते सुबन्धोरसुमाह्वयन् ॥१००॥
शरीरमभिनिर्दिश्य सुबन्धोः पतितं भुवि ।
सूक्तशेषं जगुश्चास्य चेतसो धारणाय ते ॥१०१॥
लब्धासुं चायमित्यस्यां पृथक् पाणिभिरस्पृशन् ।
षळिदं वैश्वदेवानि द्वितीयेऽङ्गिरसां स्तुतिः ॥१०२॥
जन्म कर्म च सख्यं च इन्द्रेण सह कीर्तयन् ।
स्तौति प्र नूनमित्याद्याः सावर्ण्यस्य मनो स्तुतिः ॥१०३॥ २१॥
तस्यैव चायुषोऽर्थाय देवान्स्तौत्यभ्ययादृषिः ।
सुत्रामाणं महीमू षु दक्षस्येत्यदिते स्तुतिः ॥१०४॥
पथ्यास्वस्तेः स्वस्तिरिद्धि स्वस्ति नो मरुतां स्तुतिः ।
मारुतीमृचमन्वाहेत्य् उक्तमाध्वर्यवेषु हि ॥१०५॥
या गौरिति तथैवास्यां स्तूयते मध्यमा तु वाक् ।
मित्राय मैत्रावरुणी भुज्युमंहस आश्विनी ॥१०६॥
A स्तौत्य*पि च मनुं स्वस्ति त्वृचे वाचं च मध्यमाम् ।
अथेमां द्वे बार्हस्पत्ये भद्रा आग्नेयमाग्नियः ॥१०७॥
B प्रथमे बार्हस्पत्ये तु अर्धर्चे ब्रह्मणस्पतिः* ।
B वैश्वदेवेऽपि सूक्तेऽच स्तुतोऽर्धर्चे बृहस्पतिः ।
B ब्रह्मणस्पतिरित्यस्मिन् लिङ्गवाक्यविकारतः* ॥१०८॥ २२॥
यज्ज्योतिरमृतं ब्रह्म यद्योगात्समुपाश्नुते ।

तज्ज्ञानमभितुष्टाव सूक्तेनाथ बृहस्पतिः ॥ १०९ ॥
जीवनार्थं प्रयोगस्तु मन्त्राणां प्रतिषिध्यते ।
वेदतत्त्वार्थविज्ञानं प्रायेणात्र हि दृश्यते ॥ ११० ॥
आचार्याः केचिदित्याहुर् अत्र वाग्विदुषां स्तवः ।
यथाभिर्निन्द्यतेऽत्रर्ग्भिः सूक्तेऽन्याभिरनर्थवित् ॥ १११ ॥
यथैतामन्वविन्दन्त विद्वांसर्षिगतां सतीम् ।
यथा च व्यभजन् यज्ञे तदत्रोक्तं तृतीयया ॥ ११२ ॥
प्रशस्यते दशम्या तु विद्वानुत्तमया त्वृचा ।
यज्ञे महर्त्विजामाह विनियोगं च कर्मणाम् ॥ ११३ ॥ २३ ॥
परे तु स्तूयते दक्षो* अष्टौ चैवादितेः सुताः ।
धातेन्द्रो वरुणो मित्रो अंशः सूर्योऽर्यमा भगः ॥ ११४ ॥
ऐन्द्रे जनिष्ठाः सूक्ते द्वे प्र स्वित्यत्र परं तु यत् ।
तत्र प्राच्यः प्रतीच्यश्च स्रवन्त्यो दक्षिणाश्च याः ॥ ११५ ॥
ताः सप्त सप्तकैर्वर्गैः संस्तूयन्ते प्रधानतः ।
ग्राव्णामा वो मारुते द्वे अभ्रप्रुष इति स्मृते ॥ ११६ ॥
अपश्यमिति चाग्नेये य इमा वैश्वकर्मणे ।
मान्यवे यस्त इत्येते परं यत्तु मम व्रते ॥ ११७ ॥
तदाशीर्वादबहुलं स्तौति विश्वान्दिवौकसः ।
पराकदास आग्नेयं यदुदित्यष्टकं परम् ॥ ११८ ॥ २४ ॥
मैत्रावरुण्यृक् तत्रास्ति चतुर्थ्यैन्द्राग्न्युपो*त्तमा ।
सावित्री चैव सूर्या च सैव पत्नी विवस्वतः ॥ ११९ ॥
स्तुता वृषाकपायीति उषा इति च योच्यते ।
उषा एषा त्रिधात्मानं विभज्य प्रैति गोपतिम् ॥ १२० ॥
उषाः पुरोदयाद् भूत्वा सूर्या मध्यंदिने स्थिते ।
भूत्वा वृषाकपायी च दिनान्तेष्ववगच्छति ॥ १२१ ॥

सत्यसूर्यर्तसोमानां सौर्याद्याच त्वृगुच्यते ।
पराभिस्तिसृभिस्त्वृग्भिर् उच्यते सोम ओषधिः ॥१२२॥
विस्पष्टमुत्तरा त्वासाम् ऋक् चन्द्रमसमर्चति ।
सूर्यायै भाववृत्तं तु रैभीत्यष्टाभिरुच्यते ॥१२३॥ २५॥
यदश्विनौ तृच स्तौति सूर्यमेवोत्तरार्चति ।
सप्तदशी वैश्वदेवी सौर्याचान्द्रमसी परा ॥१२४॥
परस्याः प्रथमौ पादौ सौर्यौ चान्द्रमसौ परौ ।
और्णवाभो तृचे त्वस्मिन्न् अश्विनौ मन्यते स्तुतौ ॥१२५॥
सूर्याचन्द्रमसौ तौ हि प्राणापानौ च तौ स्मृतौ ।
अहोरात्रौ च तावेव स्यातां तावेव रोदसी ॥१२६॥
अश्नुवाते हि तौ लोकाञ् ज्योतिषा च रसेन च ।
पृथक्पृथक् च चरतो दक्षिणेनोत्तरेण च ॥१२७॥
B सूर्यः सरति भूतेषु सु वीरयति तानि वा ।
B सु ईर्यत्वाय यात्येषु सर्वकार्याणि संदधत् ॥१२८॥ २६॥
B चारु द्रमति वा चायंश् चायनीयो* द्रमत्युत ।
B चमेः पूर्वं समेतानि निर्मिमीतेऽथ चन्द्रमाः ॥१२९॥
सुकिंशुकमिति त्वस्यां सूर्यामारोहतीं पतिम् ।
स्तौति विश्वावसुं चैव तृचे गन्धर्वमुत्तरे ॥१३०॥
अनृक्षरा इत्यनया यातौ स्तौतीह दंपती ।
गृहान्प्रपद्यमानां तु पराभिः पञ्चभिर्वधूम् ॥१३१॥
वाससश्च वधूनां च वरदानं प्रचक्षते ।
तत स्त्रिया* विरागस्य विभवे सति वाससः ॥१३२॥ २७॥
अन्यच्च मैथुनाद्भर्तुर् हरणं प्रतिषिध्यते ।
ये यक्ष्मनाशिनी स्तौति तृचे मा परिपन्थिनः ॥१३३॥
तृष्टमेतदिति त्वाह यादृग्वाधूयमर्हति ।

आशास्ते चैव विविधं ज्ञातिभ्यश्चानुशासनम् ॥१३४॥
बद्धा स्त्री भाववृत्तिश्च परया त्वत्र कथ्यते ।
B गृभ्णामि त ऋचा हस्तं गृह्णन्नथ धनाशिषः ॥१३५॥
B आशास्ते परया तस्याः संयोगार्थास्तथाशिषः ।
पराभिराशीश्चाशास्ते पृथक् ताभ्यां सहैव च ॥१३६॥
B अघोरेति तृचे तस्याः समिहेति द्वयोर्द्वयोः ।
B आ नः प्रजापतेर् ईमाम् ऐन्द्री चान्त्या बृहस्पतेः ॥१३७॥ २८॥
मन्त्रा वैवाहिका ह्येते निगद्यन्ते नृणामपि ।
आर्त्विज्ञा याजमानाश्च यथारूपं विशेषतः ॥१३८॥
प्रत्यृचं प्रतिकीर्त्यन्ते देवताश्चेह यासु याः ।
वदेत्तां देवतां तासु नाराशंसीर्वदेत वा ॥१३९॥
औषसीः सर्वथा चैता भाववृत्तं प्रचक्षते ।
सूर्यया सह सूक्तेऽस्मिन् पादश्चैवात्र लक्ष्यते ॥१४०॥
वि हि वार्षाकपं सूक्तम् असौ हि कपिलो वृषा ।
इन्द्रः प्रजापतिश्चैव विश्वस्मादिन्द्र उत्तरः ॥१४१॥
रक्षोहणादि चाग्नेयं त्रीन् स्तौत्यग्नीन् परं हविः ।
इमं च मध्यमं चैव असौ वैश्वानरं च यः ॥१४२॥ २९॥
ऐन्द्रात्पुरुषसूक्तं च अन्त्यया पौरुषस्य तु ।
यथैनमभजन्साध्या यज्ञार्थं सोऽर्थ उच्यते ॥१४३॥
आपान्तमन्युरित्यैन्द्र्यां स्तुतः सोमोऽत्र दृश्यते ।
सालोक्यात्साहचर्याद्वा स्तूयते सोम एव वा ॥१४४॥
निपातभाजं सोमं च अस्यां रथीतरोऽब्रवीत् ।
ऐन्द्रेषु हि निपातोऽत्र स्तुतोऽग्निररुणेन सम् ॥१४५॥
यज्ञस्य वो वैश्वदेवे प्रेत इत्युत्तरं तु यत् ।
तत्रार्बुदस्तु ग्रावाणं मूर्तिमन्तमिवार्चति ॥१४६॥

B प्र तद्दुःसीम इत्यृग्भ्यां राज्ञां दानं च शंसति ।
पुरूरवसि राजर्षाव् अप्सरास्तूर्वशी पुरा ।
न्यवसत्संविदं कृत्वा तस्मिन्धर्मं चचार च ॥१४७॥ ३०॥
तया तस्य च संवासम् असूयन् पाकशासनः ।
पैतामहं चानुरागम् इन्द्रवच्चापि तस्य तु ॥१४८॥
स तयोस्तु वियोगार्थं पार्श्वस्थं वज्रमब्रवीत् ।
प्रीतिं भिन्द्धि तयोर्वज्र मम चेदिच्छसि प्रियम् ॥१४९॥
तथेत्युक्त्वा तयोः प्रीतिं वज्रोऽभिनत्*स्वमायया ।
ततस्तया विहीनस्तु चचारोन्मत्तवन्नृपः ॥१५०॥
चरन्सरसि सोऽपश्यद् अभिरूपामिवोर्वशीम् ।
सखीभिरभिरूपाभिः पञ्चभिः पार्श्वतो वृताम् ॥१५१॥
तामाह पुनरेहीति दुःखात्सा त्वब्रवीन्नृपम् ।
अप्राप्याहं त्वयाद्येह स्वर्गे प्राप्स्यसि मां पुनः ॥१५२॥ ३१॥
आह्वानं प्रति चाख्यानम् इतरेतरयोरिदम् ।
संवादं मन्यते यास्क इतिहासं तु शौनकः ॥१५३॥
हय इति परमैन्द्रं प्र ते या ओषधीस्तवः ।
B प्रयोगे भिषजस्त्वेतद् यक्ष्मनाशाय कल्पते ॥१५४॥
आर्ष्टिषेणस्तु देवापिः कौरव्यश्चैव शंतनुः ।
भ्रातरौ कुरुषु त्वेतौ राजपुत्रौ बभूवतुः ॥१५५॥
ज्येष्ठस्तयोस्तु देवापिः कनीयांश्चैव शंतनुः ।
त्वग्दोषी राजपुत्रस्तु ऋष्टिषेणसुतोऽभवत् ॥१५६॥
राज्येन छन्दयामासुः प्रजाः स्वर्गे गते गुरौ ।
स मुहूर्तमिव ध्यात्वा प्रजास्ताः प्रत्यभाषत ॥१५७॥
प्रजास्ताः प्रत्यभाषत ॥ ३२॥

॥ इति बृहद्देवतायां सप्तमोऽध्यायः ॥

न राज्यमहमर्हामि नृपतिर्वोऽस्तु शंतनुः ।
तथेत्युक्ताभ्यसिञ्चंस्ताः प्रजा राज्याय शंतनुम् ॥१॥
ततोऽभिषिक्ते कौरव्ये वनं देवापिराविशत् ।
न ववर्षाथ पर्जन्यो राज्ये द्वादश वै समाः ॥२॥
ततोऽभ्यगच्छद्देवापिं प्रजाभिः सह शंतनुः ।
प्रसादयामास चैनं तस्मिन्धर्मव्यतिक्रमे ॥३॥
शिशिक्ष चैनं राज्येन प्रजाभिः सहितस्तदा ।
तमुवाचाथ देवापिः प्रह्वं तु प्राञ्जलिस्थितम् ॥४॥
न राज्यमहमर्हामि त्वग्दोषोपहतेन्द्रियः ।
याजयिष्यामि ते राजन् वृष्टिकामेज्यया स्वयम् ॥५॥ १॥
ततस्तं तु पुरोऽधत्त आर्त्विज्याय स शंतनुः ।
स चास्य चक्रे कर्माणि वार्षिकाणि यथाविधि ॥६॥
बृहस्पते प्रतीत्यृग्भिर् ईजे चैव बृहस्पतिम् ।
B द्वितीययास्य सूक्तस्य बोधिते जातवेदसा ॥७॥
B आस्ये ते द्युमतीं वाचं दधामि स्तुहि देवताः ।
ततः सोऽस्मै ददौ प्रीतो वाचं देवीं तया च सः ॥८॥
ऋग्भिश्चतसृभिर्देवाञ् जगौ वृष्ट्यर्थमेव तु ।
अग्निं च सूक्तशेषेण कमैन्द्रं सूक्तमुत्तरम् ॥९॥
इन्द्र दृह्येति विश्वेषाम् उदित्यृत्विक्स्तुतिः परम् ।
शक्तिप्रकाशनेनैषां विनियोगोऽत्र कीर्त्यते ॥१०॥ २॥
प्रेतीतिहाससूक्तं तु मन्यते शाकटायनः ।
यास्को द्रौघणमैन्द्रं वा वैश्वदेवं तु शौनकः ॥११॥

आजावनेन भार्म्यश्व* इन्द्रासोमौ तु मुद्गलः ।
अजयद्वृषभं युक्त्वा ऐन्द्रं च द्रुघणं रथे ॥१२॥
B युध्यन् संख्ये जयं प्रेप्सुर् ऐन्द्रोऽप्रतिरथो* जगौ ।
आशुरैन्द्रमप्वा* देवी अमीषामित्यृचि स्तुता ॥१३॥
B चतुर्थी बार्हस्पत्या स्यान् नाकुले च महानिति* ।
तृचस्तु मारुतः प्रेतेत्य्* ऐन्द्री वा ब्रह्म यत्परम् ॥१४॥
तत्रानिरुक्तसूक्तादाव् ऋगेका सूर्यमर्चति ।
घर्मपराश्चतस्रस्तु सवितारमभीति या ॥१५॥ ३॥
सूक्तशेषस्य षडृचः सूर्याचन्द्रमसौ सह ।
तुष्टावेन्द्रमसावीति अष्टकोऽस्मात्परेण तु ॥१६॥
कौत्सः कदा वसो सूक्तं दुर्मित्रो नाम नामतः ।
सुमित्रश्चैव नाम स्याद् गुणार्थमितरत्पदम् ॥१७॥
भूतांशस्तु प्रजाकामः कर्माणि कृतवान्पुरा ।
न हि लेभे प्रजाः काश्चित् काश्यपो मुनिसत्तमः ॥१८॥
उवाच भार्या भूतांशं सुतानिच्छसि यावतः ।
तावतो जनयिष्यामि देवता द्वन्द्वश स्तुहि ॥१९॥
तमभ्ययुस्तु सर्वाणि द्वन्द्वानि स्तुतिकाम्यया ।
तान्यवेक्ष्याथ तच्चक्रे नासत्यौ सूक्तभागिनौ ॥२०॥ ४॥
तदेतदन्ततो भावाद् आश्विनं सूक्तमुच्यते ।
न ह्यस्मिन्देवतालिङ्गं प्रागन्त्याद्दृश्यते पदात् ॥२१॥
सूक्तेन तु परेणात्र स्वयमाविरभूदिति ।
आत्मानमेव तुष्टाव प्राजापत्याथ दक्षिणा ॥२२॥
दातॄनत्र स्तुतानेके दक्षिणानां वदन्ति तु ।
दातृत्वाद्दक्षिणानां च भोजाश्चतसृभि स्तुताः ॥२३॥
असुराः पणयो नाम रसापारनिवासिनः ।

गास्तेऽपजह्रुरिन्द्रस्य न्यगूहंश्च प्रयत्नतः ॥२४॥
बृहस्पतिस्तथापश्यद् दृष्ट्वेन्द्राय शशंस च ।
प्राहिणोत्तत्र दूत्येऽथ सरमां पाकशासनः ॥२५॥ ५॥
किमित्यचायुजाभिस्तां पप्रच्छुः पणयोऽसुराः ।
कुतः कस्यासि कल्याणि किं वा कार्यमिहास्ति ते ॥२६॥
अथाब्रवीत्तान्सरमा दूत्यैन्द्री विचराम्यहम् ।
युष्मान्व्रजं चान्विषन्ती गाश्चैवेन्द्रस्य पृच्छतः ॥२७॥
विदित्वेन्द्रस्य दूतीं ताम् असुराः पापचेतसः ।
ऊचुर्मा सरमे गास्त्वम् इहास्माकं स्वसा भव ॥२८॥
B विभजामो गवां भागं माहिता ह ततः पुनः ।
सूक्तस्यास्यान्यया चर्चा युग्माभिस्त्वेव सर्वशः ॥२९॥
साब्रवीन्नाहमिच्छामि स्वसृत्वं वा धनानि वा ।
पिबेयं तु पयस्तासां गवां यास्ता निगूहथ ॥३०॥ ६॥
असुरास्तां तथेत्युक्त्वा तदाजह्रुः पयस्ततः ।
सा स्वभावाच्च लौल्याच्च पीत्वा तत्पय आसुरम् ॥३१॥
परं संवननं हृद्यं बलपुष्टिकरं ततः ।
शतयोजनविस्ताराम् अतरत्तां रसां पुनः ॥३२॥
यस्याः पारे परे तेषां पुरमासीत्सुदुर्जयम् ।
पप्रच्छेन्द्रश्च सरमां कच्चिद्गा दृष्टवत्यसि ॥३३॥
सा नेति प्रत्युवाचेन्द्रं प्रभावादासुरस्य तु ।
तां जघान पदा क्रुद्धः उद्गिरन्ती पयस्ततः ॥३४॥
जगाम सा भयोद्विग्ना पुनरेव पणीन्प्रति ।
पदानुसारिपद्धत्या रथेन हरिवाहनः ॥३५॥ ७॥
गत्वा जघान च पणीन् गाश्च ताः पुनराहरत् ।
तेऽबदन्वैश्वदेवं तु ब्रह्मजाया जुहूर्गौ ॥३६॥

B जाम*दग्न्यं समिद्धो ऽद्य आप्रीसूक्तमतः परम् ।
युगपद्वै व्रजन्तं तं वैरूपा ऋषयस्त्रिभिः ॥३७॥
इन्द्रं प्रतिजगुः सूक्तैः पणीन्प्रति मनीषिणः ।
वैश्वदेवं परं सूक्तं घर्मेत्येके ऽत्र तु स्तुतान् ॥३८॥
देवानिन्द्रं च मन्यन्ते छन्दांस्यग्निं च मध्यमम् ।
आग्नेयं चित्र इत्येतज् जगादर्षिरुपस्तुतः ॥३९॥
पिबेन्द्रं स्तौति नेत्यन्नं राक्षोघ्नाग्नेयमुत्तरम् ।
इति वै ला*बमैन्द्रं तद् आप्याः षष्ठ्यां निपातिताः ॥४०॥ ८॥
प्राजापत्यमथाग्नेयं वैन्यमित्यनुपूर्वशः ।
वरुणेन्द्राग्निसोमानाम् इमं न इति संस्तवः ॥४१॥
चतस्रस्त्वत्र सूक्तादाव् अग्निरात्मस्तवं जगौ ।
स्तुतः सोमस्तु षष्ठ्या च नवम्या च पदैस्त्रिभिः ॥४२॥
वारुण्यस्त्वितरास्तिस्र ऐन्द्रमेवोत्तमं पदम् ।
अहं वाक्सूक्तमर्यम्णो मित्रस्य वरुणस्य च ॥४३॥
न तं राज्ञ्याः परं सूक्तं वैश्वदेवं ममेति यत् ।
नमस्ते वैद्युतं सूक्तम् आशीर्वादः परं तु यत् ॥४४॥
यां कल्पयन्ति नो ऽरयः कृत्यानाशनमात्मनः ।
हिरण्यस्तुतिरायुष्यं नासद्यत्परमेष्ठिनः ॥४५॥ ९॥
वदन्ति भाववृत्तं तद् यो यज्ञ इति चोत्तरम् ।
अपैन्द्रमत्र त्वाश्विन्यौ चतुर्थी पञ्चमी स्मृते ॥४६॥
मैत्रावरुणमीजानं प्रथमायामृचि स्तुताः ।
अर्धर्चे द्यौश्च भूमिश्च अश्विनौ चोत्तरे ततः ॥४७॥
प्रो ष्वैन्द्रे वैश्वदेव्यृक् तु नकिर्देवा मिनीमसि ।
यस्मिन्वृक्ष इति त्वस्मिन् द्युस्थान स्तूयते यमः ॥४८॥
